Apart from the purpose for which it is meant the pretension of snake-bite has its own charm. It is lovely and one cannot detect even a little flaw in it. We cannot help quoting it in this place.

विदूषकः—परित्रायतां, परित्रायतां भवान्। सर्पेणास्मि दष्टः

(सर्वे विषण्णाः ।)

राजा—कष्टं कष्टम्। क्व भवान् परिभ्रान्तः ।

विदू०—देवीं द्रक्ष्यामीत्याचारपुष्पग्रहणकारणात् प्रमदवनं गतोऽस्मि ।

देवी०—हा धिक् हा धिक्। अहमेव ब्राह्मणस्य जीवितसंशयनिमित्तं जातास्मि

विदू०—तस्मिन्नशोकस्तबककारणात् प्रसारिते दक्षिणहस्ते कोटरनिर्गतेन सर्परूपेण कालेन दष्टोस्मि, नन्वेते द्वे दंशपदे (इति दंशं दर्शयति)।

राजा—सम्प्रति विषवैद्यानां कर्म। जयसेने ध्रुवसिद्धिः क्षिप्रमानीयताम्।

विदू०—अहो पापेन मृत्युना गृहीतोऽस्मि ।

राजा—मा कातरो भूः । अविषोऽपि कदाचिद्दंशो भवेत् ।

विदू०—कथं न भेष्यामि । सिमसिमायन्ति मेऽङ्गानि ।

देवी—हा दर्शितमशुभं विकारेण । अवलम्बध्वं ब्राह्मणम्।

(परिजनः ससम्भ्रममवलम्बते)।

This seriousness in comedy resulting in hearty humour at the end is characteristic of Kálidása. Western tragedians employ humour just before the final storm in order to deepen the coming gloom by contrast. Cleopatra's witty conversation with the peasant who brings the asp which is the instrument of her self-sought death is the best trick of art. Hamlet has a humorous talk with the grave-diggers just before his end. The porter's scene in Macbeth is another example of this kind. Similarly this idea of contrast was present before the dramatist when he introduced seriousness into humour. Compare the seriousness of Ganadása and Haradatta and the seriousness of the Vidúsaka. So the use of this trick in comedy has a delightful effect upon the spectator. The best example of ready wit is the speech of the Vidúsaka when Nipunika throws her stick upon him. He says:—

'कथं दण्डकाष्ठमेतत्। अहं पुनर्जाने यन्मया केतकीकण्टकैर्दंशं कृत्वा सर्पस्य इव दंशः कृतस्तन्मे फलितम्' ।

DRAMATIS PERSONAE.

सूत्रधारः—The stage-manager.

पारिपार्श्विकः—The assistant of the Sútradhára.

राजा (अग्निमित्रः)—The Hero, the King of Vidisá.

विदूषकः (गौतमः)—A Bráhmaua, the King's personal friend and court-wit.

अमात्यः (वाहतवः)—A minister of Agnimitra.

हरदत्तः (आचार्यः)—A dancing-master attached to the Court.

गणदासः (आचार्यः)—Another dancing-master attached to the Court, and a rival of Haradatta.

कञ्चुकी (मौद्गल्यः)—The Chamberlain.

सारसिकः—A servant of Queen Dhárini.

वैतालिकः (०कौ)—A bard (or bards) attached to the Court.

मालविका—The Heroine, sister of Mádhavasena.

धारिणी (देवी)—The principal wife of Agnimitra, and the Queen.

इरावती—Another wife of Agnimitra, junior to Dhárini.

परिव्राजिका (कौशिकी)—A female ascetic, attached to court.

प्रतीहारी (जयसेना)—The door-keeper of the palace.

बकुलावलिका—A maid-servant of Queen Dhárini and a friend of Málaviká.

कौमुदिका, नागरिका—Maid-servants of Dhárini.

निपुणिका—A maid-servant of Irávatí.

समाहितिका—A servant of the Parivrájiká.

उद्यानपालिका (मधुकरिका)—Gardener of the *Pramadavana.*

ज्योत्स्निका—An artisan from Yajnasena's Court.

मदनिका—Another artisan from Yajnasena's Court.

मालविकाग्निमित्रम्

प्रथमोऽङ्कः

एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः परस्ताद्यतीनाम्।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥१॥

(नान्द्यन्ते)

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य ।) मारिष, इतस्तावत् ।

(प्रविश्य ।)

पारिपार्श्विकः—भाव, अयमस्मि ।

सूत्र०—अभिहितोऽस्मि विद्वत्परिषदा कालिदासग्रथितवस्तु माल-

एकैश्वर्य इत्यादि । सः । ईशः ईश्वरः । सन्मार्गालोकनाय सन् प्रशस्तः मार्गः मोक्षमार्गः, तस्य आलोकनाय । वः युष्माकम् । तामसीं तमःसंबन्धिनीम् । वृत्तिं प्रवृत्तिम् । व्यपनयतु अपाकरोतु । कथंभूत ईश्वरः । यः प्रणतबहुफले । बहूनि फलानि यस्मात् तथोक्तम्, प्रणतानां प्रणामं कुर्वतां भक्तानां बहुफलं तस्मिन् । एकैश्वर्य ईश्वरस्य भावः ऐश्वर्यम्, एकं मुख्यम् अनन्यसाधारणम् तच्च तदैश्वर्यं च तस्मिन् स्थितोपि । अणिमाद्यैश्वर्ययुक्तोऽपीत्यर्थः । स्वयम् आत्मना । कृत्तिवासाः कृत्तिः चर्म वासः वसनं यस्य स तथोक्तः । यः कान्तासंमिश्रदेहोऽपि कान्तया स्त्रिया संमिश्रः संमिश्रितः देहः यस्य तादृशोऽपि सन् । अविषयमनसां न विद्यन्ते विषयाः शब्दादयः येषां तानि अविषयाणि मनांसि येषां तेषाम् । यतीनां संयमिनाम् । परस्तात् श्रेष्ठः । 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' इति अस्तातिप्रत्ययः । अष्टाभिः तनुभिः पृथिव्यादिमूर्तिभिः । कृत्स्नं सर्वम् । जगत् लोकम् । बिभ्रतः धारयतः । यस्य । अभिमानः प्रणयः ममत्वम् । न भवति ॥१॥

विद्वत्परिषदा विदुषां विपश्चितां परिषत् सभा तया । कालिदासग्रथितवस्तु

विकाग्निमित्रं नाम नाटकमस्मिन् वसन्तोत्सवे प्रयोक्तव्यमिति । तदा-रभ्यतां संगीतम् ।

पारि०—मा तावत् । प्रथितयशसां भाससौमिल्लककविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं बहुमानः ।

सूत्र०—अयि, विवेकविश्रान्तमभिहितम् । (पश्य)

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥२॥

पारि०—आर्यमिश्राः प्रमाणम् ।

सूत्र०—तेन हि त्वरतां भवान् ।

शिरसा प्रथमगृहीतामाज्ञामिच्छामि परिषदः कर्तुम् ।
देव्या इव धारिण्याः सेवादक्षः परिजनोऽयम् ॥३॥

(इति निष्क्रान्तौ)

कालिदासेन ग्रथितं वस्तु कथा यस्मिन् । मालविकाग्निमित्रम् अधिकृत्य कृते ग्रन्थे इत्यण् । संगीतम् तौर्यत्रिकम् । आरभ्यताम् प्रयोक्तुं यत्नः क्रियताम् । मा तावत् मा इति निवारणे । भासः कविपुत्रः सौमिल्लकः इति प्राक्तनाः कवयः । प्रबन्धान् रूपकाणि । अतिक्रम्य परिहृत्य । क्रियायां कृतौ रूपके । कथं बहुमानः आदरातिशयः । विवेकविश्रान्तं विवेकदुर्बलम्, विवेकशून्यमित्यर्थः । क्रिया-विशेषणमेतत् ।

पुराणमित्यादि । सर्वम् । कवेः कर्म काव्यम्, कृतिरित्यर्थः । पुराण-मित्येव पुराणत्वादेव । साधु रम्यम् । न भवति । नवमिति च नवत्वादेव । अवद्यं गर्ह्यम् । न । किं तु । सन्तः विद्वांसः । परीक्ष्य पुराणं नवं च काव्यं गुणतो दोषतश्च परामृश्य । अन्यतरत् तयोरेकं पुराणं नवं वा । गुणयुक्तमित्यर्थः । भजन्ते स्वीकुर्वन्ति । मूढः अज्ञः । परप्रत्ययनेयबुद्धिः परस्य अन्यस्य प्रत्ययेन ज्ञानेन नेया प्राप्या बुद्धिर्यस्य तथोक्तः ॥२॥

शिरसेत्यादि । शिरसा मूर्ध्ना । प्रथमगृहीतां पूर्वस्वीकृताम् । परिषदः सदसः । आज्ञाम् । कर्तुं निर्वर्तयितुम् । इच्छामि अभिलषामि । धारिण्याः देव्याः धारिणी नाम कथानायकस्य पत्नी, तस्याः । आज्ञाम् । सेवादक्षः परि-चर्यानिपुणः । अयं परिजनः परिचारिकाजन इव ॥३॥

(ततः प्रविशति बकुलावलिका)

बकुलावलिका—आणत्तम्हि देवीए धारिणीए । अइरप्पउत्तोवदेसं
आज्ञप्तास्मि देव्या धारिण्या । अचिरप्रवृत्तोपदेशं
छलिअं णाम णट्टअंअन्तरेण कीरिसी मालविअत्ति नट्टाअरिअं अज्ज-
छलिकं नाम नाट्यमन्तरेण कीदृशी मालविकेति नाट्याचार्यमार्य-
गणदासं पुच्छिदुं । ता दाव संगीतसालं गच्छम्मि । (इति परिक्रामति)
गणदासं प्रष्टुम् । तत्तावत् संगीतशालां गच्छामि ।

(ततः प्रविशत्याभरणहस्ता द्वितीया चेटी)

प्रथमा—(द्वितीयां दृष्ट्वा) हला कोमुदीए कुदो दे इअं धीरदा ।
सखि कौमुदिके कुतस्त इयं धीरता ।
जं समीवेण वि अदिक्कमन्ती इदो दिट्ठिं ण देसि ।
यत् समीपेनाप्यतिक्रामन्तीतो दृष्टिं न ददासि ।

द्वितीया—अह्मो बउलावलिआ । सहि इदं देवीए सिप्पिसआ-
अहो बकुलावलिका । सखि इदं देव्याः शिल्पिसका-
सादो आणीदं णाअमुद्दासणाहं अङ्गुलीअअं सिणिद्धं णिज्झाअन्ती
शात् आनीतं नागमुद्रासनाथम् अङ्गुलीयकं स्निग्धं निध्यायन्ती
तुह उवालम्भे पडिदम्हि ।
तवोपालम्भे पतितास्मि ।

प्रथमा—(विलोक्य) ठाणे सज्जदि दिट्ठी । इमिणा अङ्गुलीअएण
स्थाने सज्जति दृष्टिः । अनेनाङ्गुलीयकेन
उब्भिण्णकिरणकेसरेण कुसुमिदो विअ दे अग्गहत्थो ।
उद्भिन्न-किरण-केसरेण कुसुमित इव ते अग्रहस्तः ।

द्वितीया—हला कहिं पत्थिदासि ।
सखि कुत्र प्रस्थितासि ।

ततः प्रविशतीत्यादि । अन्तरेण उद्दिश्य । अन्तरेण इत्ययं निपात उद्देशार्थे वर्तते । छलिकं नाम नृत्तविशेषः । शिल्पिसकाशात् आनीतं स्वर्णकारसमीपात् आनीतम् । नागमुद्रा नागविषहरणार्थमुद्रा । उपालम्भे आक्षेपे । उपदेशग्रहणं नृत्तगीतवाद्यादिग्रहणम् ।

प्रथमा—देवीए वअणेण नट्टाअरिअं अज्जगणदासं पुच्छिदुं
देव्या वचनेन नाटयाचार्यमार्यगणदासं प्रष्टुम्
उवदेसग्गहणे कीरिसी मालविअत्ति ।
उपदेशग्रहणे कीदृशी मालविकेति ।

द्वितीया—सहि ईरिसेण वावारेण असंणिहिदा वि दिट्ठा किल
सखि ईदृशेन व्यापारेण असंनिहितापि दृष्टा किल
सा भट्टुणा ।
सा भर्त्रा ।

प्रथमा—आम । सो जणो देवीए पास्सगदो चित्ते दिट्ठो ।
आम । स जनो देव्याः पार्श्वगताश्चित्रे दृष्टः ।

द्वितीया—कहंविअ ।
कथमिव ।

प्रथमा—सुणु । चित्तसालं गदा देवी पच्चग्गवण्णराअं चित्तरेहं
श्रृणु । चित्रशालां गता देवी प्रत्यग्रवर्णरागां चित्ररेखाम्
आअरिअस्स ओलोअन्ती चिट्ठदि । तस्सिं अन्तरे भट्टा उवट्ठिदो ।
आचार्यस्यावलोकयन्ती तिष्ठति । तस्मिन्नन्तरे भर्तोपस्थितः ।

द्वितीया—तदो तदो ।
ततस्ततः ।

प्रथमा—तदो अ उवआराणन्तरं एक्कासणोवविठ्ठेण भट्टुणा चित्त-
ततश्चोपचारानन्तरम् एकासनोपविष्टेन भर्त्रा चित्र-
गदाए देवीए परिअणमज्झगदं आसण्णअरं तं देक्खिअ देवी पुच्छिदा ।
गताया देव्याः परिजनमध्यगताम् आसन्नतरां तां दृष्ट्वा देवी पृष्टा ।

द्वितीया—किंति ।
किमिति ।

प्रथमा—अपुव्वा इयं दारिआ, आसण्णा अ देवीए आलिहिदा ।
अपूर्वेयं दारिका, आसन्ना च देव्या आलिखिता ।
किं णामहेएत्ति ।
किंनामधेयेति ।

द्वितीया—आकिदिविसेसेसु आअरो पदं करेदि। तदो तदो।
आकृतिविशेषेष्वादरः पदं करोति। ततस्ततः।

प्रथमा—तदो अवहीरिअवअणो भट्टा संकिदो देवीं पुणो वि
ततोऽवधीरितवचनो भर्ता शङ्कितो देवीं पुनरप्य-
अणुबन्धिदुं पवुत्तो। तदो जाव देवी ण कहेदि दाव कुमारीए वसु-
नुबन्धुं प्रवृत्तः। ततो यावद् देवी न कथयति तावत् कुमार्या वसु-
लच्छीए आचक्खिदम्। आवुत्त एषा मालविअत्ति।
लक्ष्म्याऽऽख्यातम्। आवुत्त एषा मालविकेति।

द्वितीया—(सस्मितम्) सरिसं खु बालभावस्स। अदो वरं कहेहि।
सदृशं खलु बालभावस्य। अतः परं कथय।

प्रथमा—किं अण्णं। संवदं मालविआ सविसेसं भट्टुणो दंसण-
किमन्यत्। साम्प्रतं मालविका सविशेषं भर्तुर्दर्शन-
पहादो रक्खीअदि।
पथाद् रक्ष्यते।

द्वितीया—हला अणुचिट्ठ अत्तणो णिओअं। अहं वि एदं
सखि अनुतिष्ठात्मनो नियोगम्। अहमप्येतद्
अङ्गुलीअअं देवीए उवणइस्सम्। (इति निष्क्रान्ता)
अङ्गुलीयकं देव्या उपनेष्यामि।

प्रथमा—(परिक्रम्यावलोक्य) एसो णट्टाअरिओ अज्जगणदासो
एष नाटयाचार्य आर्यगणदासः
संगीदसालादो णिक्कम्मदि। जावसे अत्ताणं दंसेमि। (इति परिक्रामति)
संगीतशालातो निष्क्रामति। यावदस्मा आत्मानं दर्शयामि।

(प्रविश्य)

गणदासः—कामं खलु सर्वस्यापि कुलविद्या बहुमता। न पुनरस्माकं नाटयं प्रति मिथ्यागौरवम्। तथाहि।

देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।

बालभावस्य बालबुद्धेः। दर्शनपथात् दर्शनतः। नियोगः आज्ञा। अनुतिष्ठ कुरु।

देवानामित्यादि। मुनयः भरतादयः। इदं नाट्यम्। देवानाम् इन्द्रादी-

त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्* ॥४॥

वकु०—(उपेत्य) अज्ज बन्दामि ।
आर्य वन्दे ।

गण०—भद्रे चिरं जीव ।

बकु०—अज्ज देवी पुच्छदि । अवि उवदेसग्गहणे णादिकीलिस्सेदि वो सिस्सा मालविअत्ति ।
आर्य देवी पृच्छति । अप्युपदेशग्रहणे नातिक्लेशयति वः शिष्या मालविकेति ।

गण०—भद्रे विज्ञाप्यतां देवी परं निपुणा मेधाविनी चेति । किं बहुना
यद् यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।
तत्तद्विशेषकरणात्प्रत्युपदिशतीव मे बाला ॥५॥

नाम् । क्रतुम् । आमनन्ति कथयन्ति । कीदृशम् । कान्तं पशुविशसनादिरहितमित्यर्थः । पुनः कीदृशम् । चाक्षुषं चक्षुरनुभाव्यम् । पुनः कीदृशमिदं नाट्यम् । रुद्रेण । उमाकृतव्यतिकरे उमया पार्वत्या कृतः व्यतिकरः सम्बन्धः यस्य तस्मिन् । स्वाङ्गे आत्मदेहे । द्विधा द्विप्रकारेण लास्यताण्डवरूपेण । विभक्तं पृथक् कृतम् । अत्र नाट्ये । त्रैगुण्योद्भवं त्रिगुणा एव सत्त्वरजस्तमांस्येव त्रैगुण्यम् । चतुर्वर्णादिभ्यः स्वार्थे ष्यञ् इति ष्यञन्तम् । तस्मादुद्भवम् उद्भूतम् । लोकचरितं लोकस्थानां रामाद्यनुकार्याणां चरितं दुःखादुःख मिश्रात्मकम् । नानारसं नाना बहुविधाः रसाः प्रीतयः यस्मात्तथोक्तम् । दृश्यते ज्ञायते । सामाजिकैरनुभूयत इत्यर्थः । पुनः कीदृशम् । नाट्यम् नटप्रयोगः । एकमपि एकतरमपि । भिन्नरुचेः भिन्नाः बहुविधाः रुचयः प्रीतयः यस्य तस्य । जनस्य । बहुधा बहुप्रकारेण, शृङ्गारहास्यादिरूपेण । समाराधनं संतर्पकम् ॥४॥

यद्यदित्यादि । प्रयोगविषये अभिनेयार्थे । मया । तस्यै मालविकायै । यद्यत् । भाविकम् । भाववत् । 'अत इनिठनौ' इति ठन् । नृत्यमित्यर्थः । उप-

---

* तदुक्तं सङ्गीतदामोदरे—
यो यस्य दयितो भावः स तं नाट्ये निरीक्षते ।
अतः सर्वमनोहारि नाट्यं कस्य न रञ्जकम् ॥ इति ।

बकु०—(आत्मगतम्) अदिक्कन्तं विअ इरावदिं पेक्खामि। किदत्था
अतिक्रान्तामिवेरावतीं पश्यामि। कृतार्थे-
दाणीं वो सिस्सा। जाए गुरुजणो एवं तुस्सदि।
दानीं वः शिष्या। यस्या गुरुजन एवं तुष्यति।

[प्रकाशम्]

गण०—भद्रे तद्विधानामसुलभत्वात्पृच्छामि, कुतो देव्यास्तत्पात्रमानीतम्।

बकु०—अत्थि देवीए वण्णावरो भादा वीरसेणो णाम भट्टुणा
अस्ति देव्या वर्णावरो भ्राता वीरसेनो नाम भर्त्रा
णम्मदातीरे अन्तवालदुग्गे ठाविदो। तेण सिप्पाहिआरे जोग्गा इअं
नर्मदातीरे ऽन्तपालदुर्गे स्थापितः। तेन शिल्पाधिकारे योग्येयं
दारिअत्ति भणिअं भइणीए देवीए उवाअणं पेसिदा।
दारिकेति भणित्वा भगिन्या देव्या उपायनं प्रेषिता।

गण०—(स्वगतम्) आकृतिविशेषप्रत्ययादेनामनूनवस्तुकां सम्भावयामि। (प्रकाशम्) भद्रे, मयापि यशस्विना भवितव्यम्। यतः

पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य॥ ६॥

बकु०—अह इं। अह कहिं वो सिस्सा।
अथ किम्। अथ कुत्र वः शिष्या।

गण०—इदानीमेव पञ्चाङ्गाभिनयमुपदिश्य मया विश्रम्यतामित्यभिहिता दीर्घिकावलोकनगवाक्षगता प्रवातमासेवमाना तिष्ठति।

दिश्यते बोध्यते। तत्तद्विशेषकरणात् तस्य तस्य भाविकस्य विशेषेण अतिशयेन करणात् निर्वर्तनात्। सा बाला। मे। प्रत्युपदिशतीव बोधयतीव॥५॥

वर्णावरो नाम पितुः क्रमविवाहे अवरवर्णायां मातर्युत्पन्नः। अनूनवस्तुकाम् अनूनम् अनल्पं विशिष्टं वस्तु वृत्तं यस्यास्तथोक्ताम्। संभावयामि मन्ये।

पात्रविशेष इत्यादि। आधातुः उपदेष्टुः। शिल्पं कला विद्या। पात्रविशेषे सत्पात्रे। न्यस्तं सत्। गुणान्तरं गुणविशेषम्। व्रजति प्राप्नोति। पयोदस्य मेघस्य। जलम्। समुद्रशुक्तौ। न्यस्तं सत् मुक्ताफलतां मौक्तिकत्वम् इव॥६॥

बकु०—तेण हि पुणो अणुजाणादु मं अज्जो। जावसे अज्जस्स
तेन हि पुनरनुजानातु माम् आर्यः। यावदस्या आर्यस्य
परितोसणिवेदणेण ऊसाइं वड्ढेमि।
परितोषनिवेदनेनोत्साहं वर्धयामि।

गण०—दृश्यतां सखी। अहमपि लब्धक्षणः स्वगृहं गच्छामि।

[इति निष्क्रान्तौ]

मिश्रविष्कम्भः

(ततः प्रविशत्येकान्तस्थितपरिजनो मन्त्रिणा लेखहस्तेनान्वास्यमानो राजा)

राजा—(अनुवाचितलेखममात्यं विलोक्य) वाहतव, किं प्रतिपद्यते वैदर्भः।

अमात्यः—देव, आत्मविनाशम्।

राजा—संदेशमिदानीं श्रोतुमिच्छामि।

अमात्यः—इदमिदानीमनेन प्रतिलिखितम् पूज्येनाहमादिष्टः। पितृव्यपुत्रो भवतः कुमारो माधवसेनः प्रतिश्रुतसंबन्धो ममोपान्तिकमुपसर्पन्नन्तरा त्वदीयेनान्तपालेनावस्कन्द्य गृहीतः। स त्वया

इदानीमित्यादि—पञ्चाङ्गाभिनयं पञ्च अङ्गानि यस्य तथोक्तं, प्रेरणमित्यर्थः, तस्य अभिनयः प्रयोगः। इदानीमेव अद्यैव। उपदिश्य शिक्षयित्वा प्रवातः प्रकृष्टः वातः यस्मिन् देशे। लब्धक्षणः लब्धः प्राप्तः क्षणः निर्व्यापारस्थितिर्विश्रामो येन तथोक्तः।

वाहतव—इति अमात्यस्य नाम। वैदर्भः विदर्भराजः। किं प्रतिपद्यते किं कार्यं मन्यते। संदेशं संदिष्टार्थम्। अनेन वैदर्भेण। इदम्। प्रतिलिखितम्। पूज्येन पूजार्हेण। त्वया अग्निमित्रेणेत्यर्थः। अहं वैदर्भः। आदिष्टः आज्ञप्तः। तमेवार्थं विवृणोति—भवत इत्यादिना। भवतः तव। पितृव्यपुत्रः पितृभ्रातृसुतः। माधवसेन इति नाम। प्रतिश्रुतसम्बन्धः प्रतिश्रुतः अङ्गीकृतः सम्बन्धः कन्याप्रदानरूपः येन तथोक्तः। ममोपान्तिकं मत्समीपम्। आगच्छन् उपसर्पन्। अन्तरा। त्वदीयेन त्वत्संबन्धिना। अन्तपालेन सीमादुर्गरक्षकेण। अवस्कन्द्य पथि प्रहृत्य। गृहीतः निरुद्धः। बन्दीकृत इत्यर्थः। स माधवसेनः। त्वया

मदपेक्षया सकलत्रसोदर्यो मोक्तव्य इति। एतन्ननु वो विदितं यत्तु-ल्याभिजनेषु राज्ञां वृत्तिरीदृशी। अतोऽत्र मध्यस्थः पूज्यो भवितुमर्हति। सोदर्या पुनरस्य ग्रहणविप्लवे विनष्टा। तदन्वेषणाय प्रयतिष्ये। अथवा, अवश्यमेव माधवसेनो मया पूज्येन मोचयितव्यः, श्रूयतामभिसंधिः।

मौर्यसचिवं विमुञ्चति यदि पूज्यः संयतं मम श्यालम्।
मोक्ता माधवसेनस्ततो मया बन्धनात्सद्यः ॥७॥

इति।

राजा—(सरोषम्) कथं कार्यविनिमयेन मयि व्यवहरत्यनात्मज्ञः। वाहतव, प्रकृत्यमित्रः प्रतिकूलकारी च मे वैदर्भः। तद्यातव्यपक्षे स्थितस्य पूर्वसंकल्पितसमुन्मूलनाय वीरसेनप्रमुखं दण्डचक्रमाज्ञापय।

अमात्यः—यदाज्ञापयति देवः।

राजा—अथवा किं भवान्मन्यते।

भवता। मदपेक्षया मदपेक्षया। अपेक्षा इच्छा। स्नेह इत्यर्थः। तया हेतुना। सकलत्रसोदर्यः भार्याभगिनीसहितः। 'वोपसर्जनस्य' इति सहशब्दस्य सादेशः। मोक्तव्यः विसर्जनीयः।

एतन्ननु वो विदितमित्यादि। वः युष्माकम्। तुल्याभिजनेषु समानवंशेषु। ज्ञातिष्वित्यर्थः। राज्ञाम्। प्रवृत्तिर्वर्तनम्। अतः अस्मात् कारणात्। अत्र अस्मिन्नर्थे। पूज्यो भवान्। मध्यस्थः समः। भवितुम्। अर्हति। अस्य माधवसेनस्य। सोदर्या पुनः स्वसा पुनः। ग्रहणविप्लवे। विनष्टा तिरोहिता। तदन्वेषणाय तस्या गवेषणाय। प्रयतिष्ये। अथवेति पक्षान्तरे। मोचयितव्यः त्याजयितव्यः। अभिसन्धिः निश्चयः।

मौर्यसचिवमित्यादि। पूज्यो भवान्। संयतं त्वया निगलितम्। श्यालं पत्नीभ्रातरम्। मौर्यसचिवं मौर्यसचिवनामानम्। विमुञ्चति यदि त्यजति चेत्। ततः तस्मात् कारणात्। मया। सद्यः सपदि। माधवसेनः बन्धनात्। मोक्ता मुक्तो भवति। मुञ्चतेः कर्मणि लुट् ॥७॥

प्रकृत्यमित्रः स्वभावतः शत्रुः।

अमात्यः—शास्त्रदृष्टमाह देवः । कुतः—

अचिराधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढमूलत्वात् ।
नवसंरोहणशिथिलस्तरुरिव सुकरः समुद्धर्तुम् ॥ ८ ॥

राजा—तेन ह्यवितथं तन्त्रकारवचनम् । इदमेव वचनं निमित्तमुपादाय समुद्योज्यतां सेनाधिपतिः ।

अमात्यः—तथा ।

(इति निष्क्रान्तः)

(परिजनो यथाव्यापारं राजानमभितः स्थितः)

(प्रविश्य)

विदूषकः—आणत्तोह्मि तत्त भवदा रण्णा । गोदम, चिन्तेहि दाव
आज्ञप्तोस्मि तत्र भवता राज्ञा । गौतम, चिन्तय ताव
उवाअं । जहा मे जदिच्छादिट्ठपदिकिदी मालविआ पच्चक्खदंसणा
दुपायम् । यथा मे यदृच्छादृष्टप्रतिकृतिर्मालविका प्रत्यक्षदर्शना
होदित्ति । मए अ तत्तहा किदं । दाव से णिवेदेमि ।
भवतीति । मया च तत्तथा कृतम् । तावदस्मै निवेदयामि ।

[इति परिक्रामति]

राजा—(विदूषकं दृष्ट्वा) अयमपरः कार्यान्तरसचिवोऽस्मानुपस्थितः ।

विदू०—(उपगम्य) वड्ढदु भवं ।
वर्धतां भवान् ।

अचिराधिष्ठितराज्यः आसन्नप्राप्तराज्यभारः । शत्रुः राजा । प्रकृतिषु अमात्यादिवर्गेषु । अरूढमूलत्वात् रूढमूलत्वाभावात् । समुद्धर्तुं समुन्मूलयितुम् । सुकरः सुखेन कर्तुं शक्यः । नवसंरोहणशिथिलः शिथिलसंरोहणः । तरुरिव । तदा अरूढमूलः अदृढप्राप्तमूलः ॥८॥

तेन अरूढमूलत्वेन हेतुना । तन्त्रकारवचनम् अर्थशास्त्रकारवचनम् । अवितथं हि तथ्यमेव । इदमेव वैदर्भस्य कार्यविनिमयरूपमेव । वचनं वाक्यं निमित्तं हेतुम् । उपादाय अवलम्ब्य । समुद्योज्यतां प्रवर्त्यताम् । यदृच्छादृष्टप्रतिकृतिः यादृच्छिके चित्रे दृष्टा । कार्यान्तरसचिवः राजकार्यव्यतिरिक्तकृत्यमन्त्री ।

राजा—(सशिरःकम्पम्) इत आस्यताम् ।

(विदूषक उपविष्टः)

राजा—अपि किंचिदुपेयोपायदर्शने व्यापृतं ते प्रज्ञाचक्षुः ।

विदू०—पओअसिद्धिं पुच्छ ।

प्रयोगसिद्धिं पृच्छ ।

राजा—कथमिव ।

विदू०—(कर्णे) एव्वमिव ।

एवमिव ।

राजा—साधु वयस्य, निपुणमुपक्रान्तम् । इदानीं दुरधिगमसिद्धावप्यस्मिन्नारम्भे वयमाशंसामहे । कुतः ।

अर्थं सप्रतिबन्धं प्रभुरधिगन्तुं सहायवानेव ।
दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि ॥९॥

(नेपथ्ये)

अलं बहु विकत्थ्य । राज्ञः समक्षमेवावयोरधरोत्तरव्यक्तिर्भविष्यति ।

राजा—(आकर्ण्य) सखे, त्वत्सुनीतिपादपस्य पुष्पमुद्भिन्नम् ।

विदू०—फलं वि अइरेण दक्खिस्ससि ।

फलमप्यचिरेण द्रक्ष्यसि ।

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—देव, अमात्यो विज्ञापयति अनुष्ठिता प्रभोराज्ञेति । एतौ पुनर्हरदत्तगणदासौ

उपेयोपायदर्शने उपेयस्य साध्यस्य मालविकासाक्षाद्दर्शनस्य उपायदर्शने साधनज्ञाने । प्रज्ञाचक्षुः प्रतिभादृष्टिः । किंचित् ईषदपि ।

इदानीमित्यादि । अस्मिन्नारम्भे मालविकासाक्षाद्दर्शनोद्योगे । दुरधिगमसिद्धौ दुर्लभसिद्धावपि । इदानीं त्वद्वचनश्रवणानन्तरम् ।

अर्थमित्यादि । सप्रतिबन्धं प्रतिरोधसहितम् । अर्थं प्रयोजनम् । अधिगन्तुं लब्धुम् । सहायवानेव जनः । प्रभुः समर्थो भवति ॥९॥

बहु विकत्थ्य आत्मश्लाघां कृत्वा । अलमलमिति प्रतिषेधे । 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति क्त्वाप्रत्ययः ।

उभावभिनयाचार्यौ परस्परजयोद्यतौ ।
त्वां द्रष्टुमिच्छतः साक्षाद्भावाविव शरीरिणौ ॥१०॥

राजा—प्रवेशय ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रम्य ताभ्यां सह प्रविष्टः) इत इतो भवन्तौ ।

गणदासः—(राजानं विलोक्य) अहो दुरासदो राजमहिमा ।

न च न परिचितो न चाप्यरम्यः
चकितमुपैमि तथापि पार्श्वमस्य ।
सलिलनिधिरिव प्रतिक्षणं मे
भवति स एव नवो नवोयमक्ष्णोः ॥११॥

हरदत्तः—महत्खलु पुरुषाकारमिदं ज्योतिः । तथा हि ।

द्वारे नियुक्तपुरुषानुमतप्रवेशः
सिंहासनान्तिकचरेण सहोपसर्पन् ।
तेजोभिरस्य विनिवर्तितदृष्टिपातै-
र्वाक्यादृते पुनरिव प्रतिवारितोऽस्मि ॥१२॥

उभावित्यादि । अभिनयाचार्यौ नाट्योपाध्यायौ । परस्परजयोद्यतौ अन्योन्यः जयमिच्छन्तौ । शरीरिणौ मूर्तौ । साक्षात् प्रत्यक्षौ । भावाविव नृत्याभिनेयार्थाविव ॥१०॥

दुरासदः आसादयितुमशक्यः । महिमा पराक्रमः ।

न च इत्यादि । अयं राजा परिचितश्च नेति न किन्तु परिचित एव । अरम्यः असौम्यश्च न किन्तु रम्य एव । तथापि चकितं सभयं यथा भवति तथा । अस्य । पार्श्वं समीपम् उपैमि ॥११॥

पुरुषाकारं पुरुषस्वरूपम् । ज्योतिः राजमहिमा ।

द्वारे इत्यादि । द्वारे नियुक्तपुरुषानुमतप्रवेशः द्वारपालानुमतिकृतप्रवेशः । सिंहासनान्तिकचरेण पार्श्वस्थितावसराधिकारजनेन । सह सहितम् । उपसर्पन् । विनिवर्तितदृष्टिपातैः विनिवार्तितदृष्टिप्रसरैः । अस्य राज्ञः । तेजोभिः पुनः प्रभावविशेषैस्तु । वाक्यात् ऋते प्रतिषेधवाक्यं विना । प्रतिवारितः निरुद्ध इवास्मि॥१२॥

कञ्चुकी—एष देवः । उपसर्पतां भवन्तौ ।

उभौ—(उपेत्य) विजयतां देवः ।

राजा—स्वागतं भवद्भ्याम् । (परिजनं विलोक्य) आसने तावदत्र भवतोः ।

(उभौ परिजनोपनीतयोरासनयोरुपविष्टौ)

राजा—किमिदं शिष्योपदेशकाले युगपदाचार्याभ्यामत्रोपस्थानम् ।

गण०—देव, श्रूयताम् । तीर्थान्मयाऽभिनयविद्या शिक्षिता । दत्तप्रयोगश्चास्मि । देवेन देव्या च परिगृहीतः ।

राजा—बाढं जाने । ततः किम् ।

गण०—सोऽहमनुना हरदत्तेन प्रधानपुरुषसमक्षमयं मे न पादरजसापि तुल्य इत्यधिक्षिप्तः ।

हर०—देव, अयमेव प्रथमं परिवादकरः । अत्रभवतः किल मम च समुद्रपल्वलयोरिवान्तरमिति । तदत्रभवानिमं मां च शास्त्रे प्रयोगे च विमृशतु । देव एव नौ विशेषज्ञः प्राश्निकः ।

विदू०—समत्थं पइण्णादं ।

समर्थं प्रतिज्ञातम् ।

गण०—प्रथमः कल्पः । अवहितो देवः श्रोतुमर्हति ।

राजा—तिष्ठतु तावत् । पक्षपातमत्र देवी मन्यते । तत्तस्याः पण्डितकौशिकीसहितायाः समक्षमेव न्याय्यो व्यवहारः ।

विदू०—सुट्ठु भवं भणादि ।

सुष्ठु भवान्भणति ।

आचार्यौ—यद्देवाय रोचते ।

राजा—मौद्गल्य, अमुं प्रस्तावं निवेद्य पण्डितकौशिक्या सार्धमाहूयतां देवी ।

तीर्थान्मयेत्यादि । तीर्थात् गुरोः । अभिनयविद्या नाट्यविद्या । शिक्षिता अभ्यस्ता । दत्तप्रयोगश्चास्मि दत्तः शिष्येभ्यः प्रदिष्टः प्रयोगो येन तथोक्तः । प्रथमः कल्पः मुख्यः कल्पः ।

न्याय्यः युक्तः । व्यवहारो विवादः । कथं पश्यसि । अनयोः कतरस्य पराजयं विचारयसीत्यर्थः ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रम्य सपरिव्राजिकया देव्या सह प्रविष्टः) इत इतो भवति ।

धारिणी—(परिव्राजिकां विलोक्य) भअवदि, हरदत्तस्स गणदासस्स अ संरम्भे कहं पेक्खसि ।
भगवति, हरदत्तस्य गणदासस्य च संरम्भे कथं पश्यसि ।

परिव्राजिका—अलं स्वपक्षावसादशङ्कया । न परिहीयते प्रतिद्वन्द्विनो गणदासः ।

धारिणी—जइवि एव्वं राअपरिग्गहो से पहाणत्तणं उवहरइ ।
यद्यप्येवं राजपरिग्रहोऽस्य प्रधानत्वमुपहरति ।

परि०—अयि, राज्ञीशब्दभाजनमात्मानमपि चिन्तयतु भवती । पश्य ।

अतिमात्रभासुरत्वं पुष्यति भानोः परिग्रहादनलः ।
अधिगच्छति महिमानं चन्द्रोऽपि निशापरिगृहीतः ॥१३॥

विदू०—अइ, उवट्ठिदा पीठमद्दिअं पण्डिअकोसिइं पुरोकरिअ देवी ।
अयि, उपस्थिता पीठमर्दिकां पण्डितकौशिकीं पुरस्कृत्य देवी ।

राजा—पश्याम्येनाम् । यैषा

मङ्गलालङ्कृता भाति कौशिक्या यतिवेषया ।
त्रयी विग्रहवत्येव सममध्यात्मविद्यया ॥१४॥

अतिमात्रेति । अनलः अग्निः । भानोः आदित्यस्य । परिग्रहात् । तेजसः उपादानात् । अतिमात्रभासुरत्वम् अतिदीप्तिमत्वम् । पुष्यति संवर्धयति । चन्द्रोऽपि । निशापरिगृहीतः रात्रिं गतः । महिमानं दीप्तिम् । अधिगच्छति अवाप्नोति॥१३॥

पीठमर्दिकाम् । पीठमर्दो नाम कामपुरुषार्थसहायो नायकसमीपवर्ती पुरुषः। स्त्री चेत् पीठमर्दिका ।

मङ्गलेति । मङ्गलं शोभनं यथा तथा अलङ्कृता भूषिता । सैषा धारिणी । यतः परिव्राजकस्य वेष इव वेषो वस्त्रादिधारणं यस्यास्तया । कौशिक्या ।

परि०—(उपेत्य) विजयतां देवः ।

राजा—भगवति, अभिवादये ।

परि०—

महासारप्रसवयोः सदृशक्षमयोर्द्वयोः ।
धारिणीभूतधारिण्योर्भव भर्ता शरच्छतम् ॥१५॥

धारिणी—जेदु अज्जउत्तो ।

जयत्वार्यपुत्रः ।

राजा—स्वागतं देव्यै । (परिव्राजिकां विलोक्य) भगवति क्रियतामासनपरिग्रहः । (सर्वे उपविशन्ति)

राजा—भगवति, अत्र भवतोर्हरदत्तगणदासयोः परस्परं विज्ञानसंघर्षिणोर्भगवत्या प्राश्निकपदमध्यासितव्यम् ।

परि०—(सस्मितम्) अलमुपालम्भेन । पत्तने सति ग्रामे रत्नपरीक्षा ।

राजा—नैतदेवम् । पण्डितकौशिकी खलु भगवती । पक्षपातिनावनयोरहं च देवी च ।

आचार्यौ—सम्यगाह देवः । मध्यस्था भगवती नौ गुणदोषतः परिच्छेत्तुमर्हति ।

राजा—तेन हि प्रस्तूयतां विवादः ।

परि०—देव,प्रयोगप्रधानं हि नाट्यशास्त्रम् । किमत्र वाग्व्यवहारेण । कथं वा देवी मन्यते ।

देवी—जइ मं पुच्छसि, एदाणं विवादं एव ण मे रोअदि ।

यदि मां पृच्छसि, एतयोर्विवाद एव न मे रोचते ।

समं । भाति प्रकाशते । अत्रोपमामाह—विग्रहवत्या शरीरिण्या । अध्यात्मविद्यया समम् । त्रयीव त्रिवेदीव ॥१४॥

महासारेति । महान् यः सारः वरः प्रसवः सन्तानः ययोस्तयोः । सदृशक्षमयोः सदृशी क्षमा सहत्वं ययोः । धारिणीभूतधारिण्योः धारिणीदेव्याश्च भूतधारिण्याः भूम्याश्च । शरच्छतं संवत्सरशतम् । भर्ता नायकः भव ॥१५॥

प्राश्निकपदं व्यावहारिकपदम् । पक्षपातिनौ स्वपक्षसहायौ । प्रस्तूयताम् आरभ्यताम् ।

गण०—देव, न मां समानविद्यया परिभवनीयमवगन्तुमर्हसि ।

विदू०—भोदि, पेक्खामो उरब्भसंवादं । किं मुहा वेअण दाणेण ।
भवति, पश्याम उरभ्रसंपातम् । किं मुधा वेतनदानेन ।

देवी—णं कलहप्पिओसि ।
ननु कलहप्रियोसि ।

विदू०—मा एव्वं । अण्णोण्णकलहिदाणं मत्तहत्थीणं एक्कदरस्सिं
मैवम् । अन्योन्यकलहितयोर्मत्तहस्तिनोरेकतरस्मि-
अणिज्जिदे कुदो उवसमो ।
न्ननिर्जिते कुत उपशमः ।

राजा—ननु स्वाङ्गसौष्ठवातिशयमुभयोर्दृष्टवती भगवती ।

परि०—अथ किम् ।

राजा—तदिदानीमतः परं किमाभ्यां प्रत्याययितव्यम् ।

परि०—तदेव वक्तुकामास्मि ।

श्लिष्टा क्रिया कस्यचिदात्मसंस्था
संक्रान्तिरन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव ॥१६॥

विदू०—सुदं अज्जेहिं भअवदीए वअणं । एसो पिण्डिदत्थो
श्रुतमार्याभ्यां भगवत्या वचनम् । एष पिण्डितार्थ
उवदेसदंसणेण णिण्णओत्ति ।
उपदेशदर्शनेन निर्णय इति ।

उरभ्रसपातम् मेषयुद्धम् । प्रत्याययितव्यं विश्वासयितव्यम् ।

श्लिष्टेत्यादि । कस्य चित् पुरुषस्य । क्रिया शिक्षा । विद्याभ्यास इत्यर्थः । आत्मसंस्था आत्मनिष्ठा सती । श्लिष्टा संगता । रम्या भवतीत्यर्थः । अन्यस्य पुरुषस्य । संक्रान्तिः शिष्येषु क्रियासंक्रमणम् । संक्रातिशब्दस्तु अन्तर्भावितण्यर्थः । विशेषयुक्ता अतिशयवती । यस्य पुरुषस्य । उभयम् आत्मसंस्थितिः परसंक्रमणं च । साधु रम्यम् । सः पुरुष एव । शिक्षकाणाम् । उपदेशकानां । धुरि अग्रे प्रतिष्ठापयितव्यः प्रतिष्ठां प्रापयितव्यः ॥१६॥ पिण्डितार्थः मथितार्थः ।

हर०—परमभिमतं नः ।

गण०—देवि, एवं स्थितम् ।

देवी—जदा उण मन्दमेधा सिस्सा उवदेसं मलिणेदि, तदा आअरि
यदा पुनर्मन्दमेधा शिष्या उपदेशं मलिनयति तदाचार्य-
अस्स दोसो णु ।
स्य दोषो नु ।

राजा—देवि, एवमापद्यते । विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयतीति ।

देवी—(स्वगतम्) कहं दाणिं अलंअज्ज-
कथमिदानीम् [गणदासं विलोक्य प्रकाशम्] अलमार्य-
उत्तस्स ऊसाहकारणं मणोरहं पूरिअ । विरम णिरत्थआदो आरम्भादो ।
पुत्रस्योत्साहकारणं मनोरथं पूरयित्वा । विरम निरर्थकादारम्भात् ।

विदू०—सुट्ठु भोदि भणादि । भो गणदास, संगीदपदं लम्भिअ
सुष्ठु भवती भणति । भो गणदास, संगीतपदं लब्ध्वा
सरस्सईए उवाअणमोदआणं खादमाणस्स किं ते सुहणिग्गहेण
सरस्वत्युपायनमोदकान् खादता किं ते सुखनिग्रहेण
विवादेण ।
विवादेन ।

गण०—सत्यमयमेवार्थो देवीवाक्यस्य । श्रूयतामवसरप्राप्तमिदानीम् ।

लब्धास्पदोऽस्मीति विवादभीरो-
स्तितिक्षमाणस्य परेण निन्दाम् ।

मलिनयति याथार्थ्यं न जानाति । आचार्यदोषः उपाध्यायासामर्थ्यम् । अद्रव्यम् अयोग्यद्रव्यम् ।

मनोरथम् अभिलाषम् । निरर्थकात् आरम्भात् अप्रयोजनोद्योगात् । उपायनमोदकानि उपहारार्थानि मोदकानि । अवसरप्राप्तं कालोचितम् ।

लब्धास्पदोऽस्मीति लब्धप्रतिष्ठोऽस्मीति । विवादभीरोः तर्कभीतस्य । परेण । निन्दाम् । तितिक्षमाणस्य यस्य पुरुषस्य । आगमः शास्त्रम् ।

यस्यागमः केवलजीविकायै
तं ज्ञानपण्यं वणिजं वदन्ति ॥१७॥

देवी—अइरोवणीदा दे सिस्सा ता अवरिणिट्ठिदस्स उवदेसस्स
अचिरोपनीता ते शिष्या तदपरिनिष्ठितस्योपदेशस्या-
अण्णाअं पदंसणं।
न्याय्यं प्रदर्शनम्।

गण०—अत एव मे निर्बन्धः।

देवी—तेण हिं दुवेवि उवदेसं भअवदीए दंसेध।
तेन हि द्वावप्युपदेशं भगवत्यै दर्शयतम्।

परि०—देवि, नैतन्न्याय्यम्। सर्वज्ञस्याप्येकाकिनो निर्णयाभ्यु-
पगमो दोषाय।

देवी—(जनान्तिकम्) मूढे परिव्वाजिए, किं मं जाग्गतिंपि सुत्तं
मूढे परिव्राजिके, किं मां जाग्रतीमपि सुप्ता-
विअ करेसि।
मिव करोषि।

[इति सासूयं परावर्तते]

(राजा देवीं परिव्राजिकायै दर्शयति)

परि०—

अनिमित्तमिन्दुवदने किमत्र भवतः पराङ्मुखी भवसि।
प्रभवन्त्योऽपि हि भर्तृषु कारणकोपाः कुटुम्बिन्यः ॥१८॥

विदू०—णं सकारणं एव्व। अत्तणो पक्खो रक्खिदव्वो।
ननु सकारणमेव। आत्मनः पक्षो रक्षितव्यः।

केवलजीविकायै जीवनार्थमात्रमेव। तम्। ज्ञानपण्यं ज्ञानविक्रेयम्। पण्यं विक्रेयं द्रव्यम्। वणिजं नैगमम्। वदन्ति।

अनिमित्तमिति। हे इन्दुवदने चन्द्रमुखि। अत्रभवतः अस्य राज्ञः। किम् पराङ्मुखी परावृत्तवदना। भवसि। कुटुम्बिन्यः स्त्रियः। भर्तृषु नायकेषु। प्रभवन्त्यः अपि। कारणकोपाः कोपकारणकुपिताः ॥१८॥

[गणदासं विलोक्य] दिट्ठिआ कोवव्वाजेण देवीए परित्तादो भवं।
दिष्ट्या कोपव्याजेन देव्या परित्रातो भवान्।
सुसिक्खिदो वि सव्वो उवदेसदंसणे ण णिउओ होदि।
सुशिक्षितोऽपि सर्वं उपदेशदर्शने न निपुणो भवति ।

गण०—देवि श्रूयताम् । एवं जनो गृह्णाति । तदिदानीम् ।

विवादे दर्शयिष्यामि क्रियासङ्क्रान्तिमात्मनः ।
यदि मां नानुजानासि परित्यक्तोऽस्म्यहं त्वया ॥१९॥

(आसनादुत्थातुमिच्छति)

देवी—(स्वगतम्) का गई । (प्रकाशम्) पहवदि आअरिओ
का गतिः । प्रभवत्याचार्यः
सिस्सजणस्स ।
शिष्यजनस्य ।

गण०—चिरमपदे शङ्कितोऽस्मि । (राजानमवलोक्य) अनुज्ञातं देव्या । तदाज्ञापयतु देवः कस्मिन्नभिनेयवस्तुन्युपदेशं दर्शयिष्यामि ।

राजा—यदादिशति भगवती ।

परि०—किमपि देव्या मनसि वर्तते । ततः शङ्कितास्मि ।

देवी—भण वीसद्धं । पहवदि पहू अत्तणो परिअणस्स ।
भण विस्रब्धम् । प्रभवति प्रभुरात्मनः परिजनस्य ।

राजा—मम चेति ब्रूहि ।

देवी—भअवदि भणेदाणीम् ।
भगवति भणेदानीम् ।

परि०—देव शर्मिष्ठायाः कृतिं चतुष्पदोत्थं छलिकं दुष्प्रयोज्यमुदाहरन्ति । तत्रैकार्थसंश्रयमुभयोः प्रयोगं पश्यामः । तावता ज्ञायत एवात्र भवतोरुपदेशान्तरम् ।

विवाद इति । विवाद अन्योन्यकलहे । आत्मनः मम । क्रियासङ्क्रान्तिं प्रयोगशिक्षाम् । दर्शयिष्यामि । यदि । माम् । न अनुजानासि अनुज्ञां न करिष्यसि । त्वया । अहम् । परित्यक्तः परिमुक्तोऽस्मि ॥१९॥

अपदे अस्थाने । उपदेशवस्तुनि नाट्यप्रयोगे ।

आचार्यौ—यदाज्ञापयति भगवती ।

विदू०—तेण हि दुवेवि वग्गा पेक्खाघरे संगीदरअणं करिअअत्त-
तेन हि द्वावपि वर्गौ प्रेक्षागृहे संगीतरचनां कृत्वा अत्र-
भवदो दूदं पेसअन्तु । अहवा मुदङ्गसद्दो एव्व णो उत्थावइस्सदि ।
भवतो दूतं प्रेषयताम् । अथवा मृदङ्गशब्द एव न उत्थापयिष्यति ।

हरदत्तः—तथा । (इत्युत्तिष्ठति)
(गणदासो धारिणीमवलोकयति)

देवी—(गणदासं विलोक्य) विअइ होहि । ण हु विअअपच्चत्थिणी
विजयी भव । न खलु विजयप्रत्यर्थिनी
अहं आअरिअस्स । (आचार्यौ प्रस्थितौ)
अहमाचार्यस्य ।

परि०—इतस्तावत् ।

आचार्यौ—(परिवृत्य) इमौ स्वः ।

परि०—निर्णयाधिकारे ब्रवीमि । सर्वाङ्गसौष्ठवाभिव्यक्तये विरल-
नेपथ्ययोः पात्रयोः प्रवेशोऽस्तु ।

उभौ—नेदमावयोरुपदेश्यम् । (इति निष्क्रान्तौ)

देवी—(राजानमवलोक्य) जइ राजकज्जेसु वि ईरिसी उवाअ-
यदि राजकार्येष्वपीदृश्युपाय-
णिउणदा अज्जउत्तस्स, तदो सोण्हं भवे ।
निपुणताऽऽर्यपुत्रस्य, ततः शोभनं भवेत् ।

राजा—

अलमन्यथा गृहीत्वा न खलु मनस्विनि मया प्रयुक्तमिदम् ।
प्रायः समानविद्याः परस्परयशःपुरोभागाः ॥२०॥

एकार्थसङ्गतम् एकस्थानसङ्गतम् । उपदेशान्तरं सामर्थ्यातिशयम् । प्रेक्षा-
गृहे नाटकशालायाम् । सर्वाङ्गसौष्ठवाभिव्यक्तये सर्वाङ्गसौन्दर्यदर्शनाय । विगत-
नेपथ्ययोः त्यक्तालङ्कारयोः ।

अलमिति । अन्यथा गृहीत्वा छलोक्त्या । अलम् । हे मनस्विनि । इदं
नाटकदर्शनम् । मया । न प्रयुक्तं नोक्तम् । तथाहि । समानविद्याः अन्यो-
न्यसदृशनाटकविद्याः । प्रायः अत्यर्थम् । परस्परयशःपुरोभागा हि अन्योन्य-
यशसि दोषदर्शिनः । साभ्यसूया इत्यर्थः ॥२०॥

(नेपथ्ये मृदङ्गध्वनिः । सर्वे कर्णं ददति)

परि०—हन्त । प्रवृत्तं संगीतम् । तथा ह्येषा

जीमूतस्तनितविशङ्किभिर्मयूरैरुद्ग्रीवैरनुरसितस्य पुष्करस्य ।
निर्ह्रादिन्युपहितमध्यमस्वरोत्था मायूरी मदयति मार्जना मनांसि ॥

राजा—देवि, सामाजिका भवामः ।

देवी—[स्वगतम्] अहो अविणओ अज्जउत्तस्स ।
अहो अविनय आर्यपुत्रस्य ।

(सर्वे उत्तिष्ठन्ति)

विदू०—(अपवार्य) भो, धीरं गच्छ । मा तत्तभोदी धारिणी
भो, धीरं गच्छ । मा तत्रभवती धारिणी

विसंवादइस्सदि ।
विसंवादयिष्यति ।

राजा—

धैर्यावलम्बिनमपि त्वरयति मां मुरजवाद्यरागोऽयम् ।
अवतरतः सिद्धिपथं शब्दः स्वमनोरथस्येव ॥२२॥

(इति निष्क्रान्ताः सर्वे)

प्रथमोऽङ्कः ।

जीमूतस्तनितेति । जीमूतस्तनितविशङ्किभिः जीमूतस्य स्तनितं गर्जितं विशङ्कन्त इति विशङ्किनः तैः । उद्ग्रीवैः उत्कण्ठैः । मयूरैः । अनुरसितस्य अनुध्वनितस्य । पुष्करस्य वाद्यभाण्डमुखस्य । मायूरी मयूरप्रिया । मार्जना । मनांसि । मदयति हर्षयति । कीदृशी मार्जना । उपहितमध्यमस्वरोत्था उपहितः संयोजितः मध्यमस्वरः मध्यमसंचितस्वरः तस्मादुत्तिष्ठति उदेतीति तथोक्ता । निर्ह्रादिनी शब्दवती । मार्जना पुष्करवादनाविशेषः ॥२१॥

धैर्यावलम्बिनमिति । अयं मुरजवाद्यरागः मुरजवाद्यस्य रञ्जकत्वम् । धैर्यावलम्बिनमपि । माम् । त्वरयति संभ्रमयति । सिद्धिपथं सिद्धिमार्गम् । अवतरतः । स्वमनोरथस्य आत्मवाञ्छितस्य । शब्द इव ध्वनिरिव ॥२२॥

द्वितीयोऽङ्कः ।

(ततः प्रविशति संगीतरचनायां कृतायामासनस्थः सवयस्यो राजा धारिणी परिव्राजिका विभवतश्च परिवारः)

राजा—भगवति, अत्र भवतोराचार्ययोः प्रथमं कतरस्योपदेशं द्रक्ष्यामः ।

परिव्राजिका—ननु समानेऽपि ज्ञानवृद्धभावे वयोवृद्धत्वाद्गणदासः पुरस्कारमर्हति ।

राजा—मौद्गल्य, एवमत्र भवतोरावेद्य नियोगमशून्यं कुरु ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः)

(प्रविश्य)

गणदासः—देव, शर्मिष्ठायाः कृतिर्लयमध्या चतुष्पदास्ति । तस्याश्चतुर्थवस्तुनः प्रयोगमेकमनाः श्रोतुमर्हति देवः ।

राजा—आचार्य, बहुमानादवहितोऽस्मि ।

(निष्क्रान्तो गणदासः)

राजा—(जनान्तिकम्) वयस्य,

नेपथ्यपरिगतायाश्चक्षुर्दर्शनसमुत्सुकं तस्याः ।
संहर्तुमधीरतया व्यवसितमिव मे तिरस्करिणीम् ॥१॥

विदूषक—(अपवार्य) उवट्ठिदं णअणमहु संणिहिद मक्खिअं च
उपस्थितं नयनमधु संनिहितमक्षिकं च

पुरस्कारं प्रथमदर्शनसंमानम् ।

देव शर्मिष्ठाया इत्यादि । शर्मिष्ठा नाम वृषपर्वणो राक्षसराजस्य दुहिता । तस्याः कृतिं काव्यम् । लयमध्या लयेन तालकालेन मध्या मध्यलययुक्ता । चतुष्पदा चत्वारि पदानि यस्याः सा । तस्याः कृतेः सम्बन्धिनः । चतुर्थस्य तुरीयस्य । वस्तुनः प्रबन्धस्य । प्रयोगम् अभिनयम् । एकमना अवहितः सन् । श्रोतुम् अर्हति ।

नेपथ्येति । नेपथ्यपरिगताया यवनिकान्तरितायाः । तस्या मालविकायाः । दर्शनसमुत्सुकम् अवलोकनोत्कण्ठितम् । मे चक्षुः । अधीरतया तरलतया । तिरस्करिणीं यवनिकाम् । संहर्तुम् अपनेतुम् । व्यवसितमिव उद्युक्तमिव ॥१॥

ता अप्पमत्तो दाणिं पेक्ख ।
तदप्रमत्त इदानीं पश्य ।

(ततः प्रविशत्याचार्यावेक्ष्यमाणाङ्गसौष्ठवा मालविका ।)

विदू०—(जनान्तिकम्) पेक्खदु भवं । ण खु से पडिच्छन्दादोपरि-
पश्यतु भवान् । न खल्वस्याः प्रतिच्छन्दात्परि-
हिअदि महुरदा ।
हीयते मधुरता ।

राजा—(अपवार्य) वयस्य

चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयम् ।
संप्रति शिथिलसमाधिं मन्ये येनेयमालिखिता ॥२॥

गणदासः—वत्से मुक्तसाध्वसा सत्त्वस्था भव ।

राजा—(आत्मगतम्) अहो सर्वस्थानानवद्यता रूपविशेषस्य ।
तथा हि—

दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव ।

ततः प्रविशतीत्यादि । आचार्यावेक्ष्यमाणाङ्गसौष्ठवा आचार्येण अवेक्ष्यमाणम् अङ्गानां सौष्ठवं यस्याः सा तथोक्ता । सौष्ठवं नाम अङ्गानां शोभन अवस्थानविशेषः ।

चित्रगतायामिति । मे हृदयं मनः । चित्रगतायाम् आलेख्यगतायाम् । अस्यां मालविकायाम् । कान्तिविसंवादशङ्कि कान्तेः शोभायाः विसंवादं विपर्यासं शङ्कते इति तथोक्तम् । संप्रति इदानीम् । साक्षाद्दर्शनवेलायामित्यर्थः । इयं मालविका । येन चित्रकारेण । आलिखिता । तं चित्रकारम् । शिथिलसमाधिं शिथिलप्रयत्नम् । मन्ये जानामि ॥ २ ॥

मुक्तसाध्वसा परित्यक्तभया, सभाकम्परहिता । सत्त्वस्था सत्त्वगुणयुक्ता । सर्वस्थानानवद्यता सर्वेषु स्थानेषु सर्वावयवेषु अनवद्यता निर्दोषता । रमणीयतत्येर्थः ।

दीर्घाक्षमित्यादि । वदनं मुखम् । दीर्घाक्षं दीर्घे आयते अक्षिणी लोचने यस्य तत्तथोक्तम् । शरदिन्दुकान्ति शरदिन्दोः शरच्चन्द्रस्य कान्तिरिव कान्तिर्यस्य तत्तथोक्तम् । बाहू भुजौ । अंसयोः स्कन्धयोः । नतौ नम्रौ । मध्यः अवलग्नम् ।

मध्यः पाणिमितो नितम्बि जघनं पादावरालाङ्गुली
छन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः ॥३॥

मालविका—(उपगानं कृत्वा चतुष्पदवस्तु गायति)

दुल्लहो पिओ मे तस्सिं भव हिअअ णिरासं
अह्मो अपङ्गओ मे पप्फुरइ किं पि वामो ।
एसो सो चिरदिट्ठो कहँ उण उवणइदव्वो
णाह मं पराहीणं तुइ परिगणअ सतिण्हम् ॥४॥

दुर्लभः प्रियो मे तस्मिन्भव हृदय निराश
महो अपाङ्गको मे प्रस्फुरति किमपि वामः ।
एष स चिरदृष्टः कथं पुनरुपनेतव्यो
नाथ मां पराधीनां त्वयि परिगणय सतृष्णाम् ॥

(ततो यथारसमभिनयति)

विदू०—(जनान्तिकम्) भो चउप्पदवत्तुअं दुवारी करिअ तुइ
भो चतुष्पदवस्तुकं द्वारीकृत्य त्वयि
उवट्ठाविदो विअ अप्पा तत्तहोदीए ।
उपस्थापित इव आत्मा तत्रभवत्या ।

पाणिमितः पाणिना हस्तेन मितः परिमितः । जघनम् । नितम्बि नितम्बातिशययुक्तम् । पादौ चरणौ । अरालाङ्गुली अराला आकुञ्चिता अङ्गुलयः ययोस्तौ तथोक्तौ । अस्याः मालविकायाः । वपुः शरीरम् । नर्तयितुः नृत्ताचार्यस्य । छन्दः अभिप्रायः । यथा यादृशः । तथा तेन प्रकारेण । श्लिष्टं संगतम् ॥३॥

उपगानम् रागलप्तिम् । चतुष्पदवस्तु चतुष्पदसंज्ञकं प्रबन्धम् ।

दुर्लभ इति । दुर्लभः लब्धुमशक्यः । प्रियः नायकः । तस्मिन् प्रिये । निराशं निर्गताभिलाषम् । भव । अहो अह्मो इति वा आश्चर्ये । मे । अपाङ्गः कटाक्षः । प्रस्फुरति स्पन्दते । चिरदृष्टः चिरकालदृष्टः । स एषः । कथमुपनेतव्यः । हे नाथ । माम् पराधीनां परवशां । त्वयि । सतृष्णां साभिलाषाम् । गणय विचारय ॥४॥

उपक्षिप्त इव न्यस्त इव ।

राजा—सखे, एवमेव ममापि हृदयम् । अनया खलु

जनमिममनुरक्तं विद्धि नाथेति गेये
वचनमभिनयन्त्या स्वाङ्गनिर्देशपूर्वम् ।
प्रणयगतिमदृष्ट्वा धारिणीसंनिकर्षा-
दहमिव सुकुमारप्रार्थनाव्याजमुक्तः ॥५॥

(मालविका गीतान्ते निष्क्रमितुमारब्धा)

विदू०—भोदि चिट्ठ । किंचि वो विसुमरिदो कम्मभेदो । तं
भवति तिष्ठ । किंचित् वो विस्मृतः कर्मभेदः । तं

दाव पुच्छिस्सम् ।
तावत्प्रक्ष्यामि ।

गणदासः—भद्रे, उपदेशविशुद्धा यातुमर्हसि ।

(मालविका निवृत्य स्थिता)

राजा—(आत्मगतम्) । अहो, सर्वास्ववस्थासु चारुता शोभान्तरं पुष्यति । तथा हि ।

वामं संधिस्तिमितवलयं न्यस्य हस्तं नितम्बे
कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयम् ।

जनमिममिति । नाथ स्वामिन् । जनमिमं मामित्यर्थः । अनुरक्तं स्निग्धम् । त्वयीति शेषः । विद्धि जानीहि । इति एवंविधे । गेये गीते । वचनं णाह मं पराहीणं इत्यादि वाक्यम् । स्वाङ्गनिर्देशपूर्वं यथा तथा अभिनयन्त्या हस्तादिभिः प्रकाशयन्त्या । अनया मालविकया । धारिणीसंनिकर्षाद्धेतोः । प्रणयगतिं मम स्नेहप्रवृत्तिम् । अदृष्ट्वा । अनुभावानामप्रकाशनादिति शेषः । सुकुमारप्रार्थना-व्याजं सुकुमारा मृदुला सुकरेत्यर्थः सा चासौ प्रार्थना च तस्याः व्याजो यस्मिन् कर्मणि तथोक्तम् । अहम् । उक्त इव उदित इव ॥५॥

शोभान्तरम् अतिशयशोभाम् ।

वाममिति । संधिस्तिमितवलयं संधौ मणिबन्धे स्तिमितः निश्चलः वलयः कङ्कणं यस्य तथोक्तः तम् । वामं सव्यम् । हस्तं नितम्बे न्यस्य निधाय । श्यामा-विटपसदृशं फलिनीशाखासंनिभं द्वितीयं दक्षिणं हस्तम् । स्रस्तमुक्तं स्रस्तं शिथिलं यथा भवति तथा मुक्तं विसृष्टं । लम्बितमित्यर्थः । कृत्वा विधाय । पादाङ्गुष्ठा-

पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं
नृत्तादस्याः स्थितमतितरां कान्तमृज्वायतार्धम् ॥६॥

देवी—णं गोदमवअणं वि अज्जो हिअए करेदि।
ननु गौतमवचनमप्यार्यो हृदये करोति।

गण०—देवि, मा मैवम्। देवप्रत्ययात्संभाव्यते सूक्ष्मदर्शिता गौतमस्य।

मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः।
पङ्कच्छिदः फलस्येव निकषेणाविलं पयः ॥७॥

(विदूषकं विलोक्य) ततः शृणुमो वयं विवक्षितमार्यस्य।

विदू०—(गणदासं विलोक्य) कोसिइं दाव पुच्छ। पच्छाजो मए
कौशिकीं तावत् पृच्छ। पश्चाद्यो मया
कम्मभेदो लक्खिदो तं भणिस्सं।
कर्मभेदो लक्षितस्तं भणिष्यामि।

गण०—भगवति, यथादृष्टमभिधीयताम्। गुणो वा दोषो वा।

परि०—यथादृष्टं सर्वमनवद्यम्। कुतः।

अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः
पादन्यासो लयमनुगतस्तन्मयत्वं रसेषु।

लुलितकुसुमे पादाङ्गुष्ठेन आलुलितम् आकृष्टं कुसुमं यस्य तस्मिन्। कुट्टिमे स्फटिकादिखचितस्थले। पातिते व्यापारिते अक्षिणी यस्मिन् कर्मणि तथोक्तम्। ऋज्वायतार्धम् ऋजु अवक्रम् आयतं दीर्घम् अर्धं शरीरस्यार्धभागः यस्मिंस्तत्। अस्याः स्थितम् अवस्थानम्। नृत्तात् नर्तनात्। अतितराम् अत्यर्थम्। कान्तं मनोहरम्। भवति ॥६॥

सूक्ष्मदर्शिता सूक्ष्मार्थज्ञता।

मन्दोऽपीति। विपश्चितः संसर्गेण पण्डितस्य सहवासेन। मन्दोऽपि अज्ञोऽपि। अमन्दतां बुद्धिमत्ताम्। एति भजते। पङ्कच्छिदः कर्दमहरस्य। फलस्य कतकबीजस्य। निकषेण घर्षणेन। आविलं कलुषितम्। पयः जलमिव ॥७॥

अङ्गैरिति। अन्तर्निहितवचनैः अन्तर्निहितानि अभ्यन्तरस्थापितानि वचनानि पदानि यैस्तैः। अङ्गैः हस्तादिभिः। अर्थो गीतार्थः। सम्यक् साधु। सूचितः प्रकाशितः। पादन्यासः पादविन्यासः। लयम्। अनुगतः अनुसृतः।

शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ
भावो भावं नुदति विषयाद्रागबन्धः स एव ॥८॥

गण०—देवः कथं वा मन्यते ।

राजा—वयं स्वपक्षे शिथिलाभिमानाः संवृत्ताः ।

गण०—अद्य नर्त्तयितास्मि ।

उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः ।
श्यामायते न युष्मासु यः काञ्चनमिवाग्निषु ॥९॥

देवी—दिट्ठिआ परिक्खआराहणेण अज्जो वड्ढइ ।
दिष्टया परीक्षकाराधनेनार्यो वर्धते ।

गण०—देवीपरिग्रह एव मे वृद्धिहेतुः । (विदूषकं विलोक्य) गौतम वदेदानीं यत्ते मनसि वर्तते ।

विदू०—पुढमोपदेसदंसणे पुढमं बह्मणस्स पूआ कादव्वा । सा णं वो विसुमरिदा ।
प्रथमोपदेशदर्शने प्रथमं ब्राह्मणस्य पूजा कर्त्तव्या । सा ननु वो विस्मृता ।

लयो नाम तालमानम् । 'तालान्तरालवर्ती यः कालोऽसौ लय ईरितः' इत्युक्तत्वात् । रसेषु रसविशेषेषु । तन्मयत्वं तादात्म्यं रसात्मता । भवतीत्यर्थः । अत्र रसशब्देनोपचारात्परितोषातिशयवन्तो भावाः कथ्यन्ते । प्रकृतरसस्यैकत्वेन रसेष्विति बहुवचनानुपपत्तिप्रसङ्गात् । अभिनयः प्रयोगः । शाखायोनिः शाखा योनिः प्रभवः यस्य तथोक्तः सन् । मृदुः सुकुमारः । शाखानाम नृत्तहस्तानां मानप्रचारः । तद्विकल्पानुवृत्तौ तस्य अभिनयस्य विकल्पो भेदः तस्य अनुवृत्तिः अनुसृतिः तस्याम् । भावः अभिनीयमानो निर्वेदादिः । विषयात् आश्रयात् प्रकृतात् स्थायिन इत्यर्थः । भावं पूर्वाभिनीतं संचारिणम् । नुदति अपाकरोति । रागबन्धः रञ्जकत्वयोगः । स एव पूर्वो यादृशस्तादृश एवेत्यर्थः ॥८॥

उपदेशमिति । उपदेशिनः शिक्षकस्य । सन्तः विद्वांसः । तम् । शुद्धं निर्मलम् । उपदेशम् । विदुः । अग्निषु गुह्याग्निषु । काञ्चनं सुवर्णमिव । युष्मासु युष्मादृशेषु । विवेकिष्वित्यर्थः । यः उपदेशः । न श्यामायते न मलिनीभवति । लोहितादित्वात् क्यष् । 'वा क्यषः' इत्यात्मनेपदम् ॥९॥

परि०—अहो प्रयोगाभ्यन्तरः प्राश्निकः ।

(सर्वे प्रहसिताः)

(मालविका स्मितं करोति)

राजा—(आत्मगतम्) उपात्तसारश्चक्षुषा मे स्वविषयः । यदनेन

स्मयमानमायताक्ष्याः किंचिदभिव्यक्तदशनशोभिमुखम् ।
असमग्रलक्ष्यकेसरमुच्छ्वसदिव पङ्कजं दृष्टम् ॥१०॥

गण०—महाब्राह्मण, न खलु प्रथमं नेपथ्यसंगीतकमिदम् । अन्यथा कथं त्वामर्चनीयं नार्चयिष्यामः ।

विदू०—मए णाम मुद्धचादएण विअ सुक्खघणगज्जिदे अन्तरिक्खे
मया नाम मुग्धचातकेनेव शुष्कघनगर्जितेऽन्तरिक्षे
जलपाणं इच्छिदं । अहवा पण्ठिदसतोसपच्चया णं मूढा जादी जदो अत्त
जलपानमिष्टम् । अथवा पण्डितसंतोषप्रत्यया ननु मूढा जातिः । यतोऽत्र
होदीए सोहणं भणिदं तदो से इमं पारितोसिअं पअच्छामि ।
भवत्या शोभनं भणितं ततोऽस्यै इदं पारितोषिकं प्रयच्छामि ।

(इति राज्ञो हस्तात्कटकमाकर्षति)

देवी—चिट्ठ दाव । गुणन्तरं अआणन्तो किंणिमित्तं तुमं आ-
तिष्ठ तावत् । गुणान्तरमजानन् किंनिमित्तं त्वमा-
हरणं देसि ।
भरणं ददासि ।

विदू०—परकेरअंति करिअ ।
परकीयमिति कृत्वा ।

देवी—(आचार्यं विलोक्य) अज्ज गणदास, दंसिदोवदेसा दे सिस्सा ।
आर्य गणदास, दर्शितोपदेशा ते शिष्या ।

अभ्यन्तरः मध्यः । उपात्तसारः गृहीतसारः । विषयः अभिलाषः ।

स्मयमानमिति । स्मयमानं समन्दस्मितम् । किञ्चिदभिव्यक्तदशनशोभि दरदृष्टदन्ताभिमुख्यम् । आयताक्ष्याः विशालाक्ष्याः । मुखम् । असमग्रलक्ष्यकेसरम् असंपूर्णदृष्टकिञ्जल्कम् । उच्छ्वसत् विकसत् । पङ्कजमिव दृष्टम् ॥१०॥

गुणान्तरं गुणविशेषम् । विभवः सामर्थ्यम् । पारितोषिकं सम्भावना ।

गण०—वत्से, प्रतिष्ठस्वेदानीम् ।

(मालविका सहाचार्येण निष्क्रान्ता)

विदू०—(जनान्तिकम्) एत्तिओ मे मदिविहवो भवन्तं सेविदुं ।

एतावान्मे मतिविभवो भवन्तं सेवितुम् ।

राजा—अलमलं परिच्छेदेन । अद्य हि

भाग्यास्तमयमिवाक्ष्णोर्हृदयस्य महोत्सवावसानमिव ।

द्वारपिधानमिव धृतेर्मन्ये तस्यास्तिरस्करणम् ॥११॥

विदू०—(जनान्तिकम्) दलिद्दो विअ आदुरो वेज्जेण ओसदं

दरिद्र इवातुरो वैद्येनौषधं

दीअमाणं इच्छसि ।

दीयमानमिच्छसि ।

(प्रविश्य)

हरदत्तः—देव, मदीयमिदानीं प्रयोगमवलोकयितुं क्रियतां प्रसादः ।

राजा—(आत्मगतम्) अवसितो दर्शनार्थः । (दाक्षिण्यमवलम्ब्य प्रकाशम्) ननु पर्युत्सुका एव वयम् ।

हर०—अनुगृहीतोऽस्मि ।

(नेपथ्ये)

वैतालिकः । जयतु जयतु देवः । उपारूढो मध्याह्नः । तथा हि

पत्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मिनीनां

सौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि ।

भाग्यास्तमयमिति । तस्याः मालविकायाः । तिरस्करणं तिरोधानम् । अक्ष्णोः । भाग्यास्तमयमिव भाग्यस्य भागधेयस्य अस्तमयमिव नाशमिव । हृदयस्य मनसः । महोत्सवावसानमिव महोत्सवस्य अवसानम् अन्तमिव । धृतेः प्रीतेः । द्वारपिधानमिव द्वारस्य प्रवेशमार्गस्य पिधानमिव निरोधमिव । मन्ये भावयामि ।

पत्रच्छायास्विति । मध्याह्नतापासहनं वदति । हंसाः । दीर्घिकापद्मिनीनां पत्रच्छायासु कमलाकरसरोजदलच्छायासु । मुकुलितनयनाः संमीलितलोचनाः सन्तः [संश्रयन्ते] अत्यर्थतापात् अतिमात्रदुःसहातपतापात् । सौधानि राजसदनानि वलभिपरिचयद्वेषि-

बिन्दूत्क्षेपान्पिपासुः परिसरति शिखी भ्रान्तिमद्वारियन्त्रं
सर्वैरुस्रैः समग्रस्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः ॥१२॥

विदू०—अविहा अविहा। बह्माणस्स भोअणवेला उवदिट्ठा।
अविधा अविधा। ब्राह्मणस्य भोजनवेलोपस्थिता।
अत्त होदोवि। उइदवेलादिक्कमे चिइच्छआ दोसं उदाहरन्ति।
अत्र भवतोपि। उचितवेलातिक्रमे चिकित्सका दोषमुदाहरन्ति।
(हरदत्तं विलोक्य) किं दाणिं भणसि।
किमिदानीं भणसि।

हर०—नास्ति मद्वचनस्यावकाशोऽत्र।

राजा—तेन हि त्वदीयमुपदेशं श्वो वयं द्रक्ष्यामः। विश्राम्यतु भवान्।

हरदत्तः—यदाज्ञापयति देवः। (इति निष्क्रान्तः)

देवी—णिव्वट्टेदु अज्जउत्तो मज्जणविहिम्।
निर्वर्तयत्वार्यपुत्रो मज्जनविधिम्।

विदू०—भोदि, विसेसेण पाणभोअणं तुवरावेहि।
भवति, विशेषेण पानभोजनं त्वरय।

परि०—(उत्थाय)स्वस्ति भवते। (इति सपरिजनया देव्या सह निष्क्रान्ता)

विदू०—भो वअस्स,ण केवलं रूवे,सिप्पेवि अदुदुदीआ मालविआ।
भो वयस्य, न केवलं रूपे, शिल्पेऽप्यद्वितीया मालविका।

राजा—वयस्य

अव्याजसुन्दरीं तां विज्ञानेन ललितेन योजयता।
परिकल्पितो विधात्रा बाणः कामस्य विषदिग्धः ॥१३॥

पारावतानि गोपानसीनिवासासहनकलरवाणि। शिखी मयूरः। बिन्दूत्क्षेपान् जल-पृषतान्। पिपासुः पातुमिच्छुः। भ्रान्तिमत् भ्रमणयुतम्। वारियन्त्रम् उद्घाटन-घटीयन्त्रम्। परिपतति समाश्रयति। समग्रः सपूर्णः। त्वम्। नृपगुणैः क्षत्रिय तेजोभिरिव। सप्तसप्तिः आदित्यः। सर्वैः उस्रैः किरणैः। दीप्यते ॥१२॥

अव्याजेति। अव्याजसुन्दरीम् अनलङ्कारमणीयाम्। तां मालविकाम्। ललितेन मनोहरेण। विज्ञानेन संगीतकलापरिज्ञानेन योजयता प्रापयता। विधात्रा ब्रह्मणा। कामस्य। बाणः। विषदिग्धः विषाक्तशल्यः। परिकल्पितः कृतः ॥१३॥

किं बहुना । सखे, चिन्तयितव्योऽस्मि ।

विदू०—भवदावि अहं । दिढं विपणिकन्दु विअ मे उअरब्भन्तरं
भवताप्यहम् । दृढं विपणिकन्दुरिव मे उदराभ्यन्तरं

दज्झइ ।
दह्यते ।

राजा—एवमेव भवान्सुहृदर्थे त्वरताम् ।

विदू०—गहीदो खणो । किंतु मेहावलीणिरुद्धा जोण्हा विअ
गृहीतः क्षणः । किंतु मेघावलीनिरुद्धा ज्योत्स्नेव

पराहीणदंसणा तत्तहोदी । भवंवि सूणपरिसरचरो विअ विहँगो
पराधीनदर्शना तत्रभवती । भवानपि सूनापरिसरचर इव विहङ्ग

आमिसलोलुओ भीरुओअ । ता अणादुरो भविअ कज्जसिद्धिं पत्थेन्तो
आमिषलोलुपो भीरुकश्च । तदनातुरो भूत्वा कार्यसिद्धिं प्रार्थयमानो

मे रोअसि ।
मे रोचसे ।

राजा—कथमनातुरो भविष्यामि ।

सर्वान्तःपुरवनिताव्यापारप्रतिनिवृत्तहृदयस्य ।
सा वामलोचना मे स्नेहस्यैकायनीभूता ॥१४॥

(इति निष्क्रान्ताः सर्वे)

इति द्वितीयोऽङ्कः ।

विपणिकन्दुर्नाम पण्यवीथिकायां व्रीहिपचनपात्रम् । यथा एवमेव इत्थमेव भवान् भोजनरूपे स्वकार्ये त्वरते तथा । सुहृदर्थे मदर्थे मालविकापुनर्दर्शने । त्वरताम् ।

गृहीतक्षणः । कालविशेषेऽवसरे व्यापारे पारतन्त्र्ये च । मध्ये तथोत्सवे च क्षणशब्दः कथ्यते षट्सु । गृहीतव्यापारः । सूना वध्यस्थलम् । अनातुरः अव्याकुलः ।

सर्वेति । सर्वान्तःपुरवनिताव्यापारं सर्वासाम् अन्तःपुरवनितानां राजमहिषीणां व्यापारं प्रति उद्दिश्य निवृत्तहृदयस्य त्यक्तमनसः । मे । सा वामलोचना मालविका । स्नेहस्य प्रेम्णः । एकायनीभूता एकं केवलम् अयनं स्थानं तद्भूता ॥ १४ ॥

तृतीयोऽङ्कः ।

(ततः प्रविशति परिव्राजिकायाः परिचारिका)

परिचारिका—आणत्तह्मि भअवदीए । समाहिदिए देवीए
आज्ञप्तास्मि भगवत्या । समाहितिके देव्या

उवाअणत्थं बीअऊरअं गेण्हिअ आअच्छत्ति । ता जाव पमदवणपालिअं
उपायनार्थं बीजपूरकं गृहीत्वाऽऽगच्छेति । तद् यावत्प्रमदवनपालिकां

मधुअरिअं अण्णेसामि । एसा तवणीआसोअं
मधुकरिकामन्विष्यामि । (परिक्रम्यावलोक्य) एषा तपनीयशोक-

ओलोअन्ती महुअरिआ चिट्ठदि जाव णं उवसप्पामि ।
मवलोकयन्ती मधुकरिका तिष्ठति । यावदेनामुपसर्पामि ।

(ततः प्रविशत्युद्यानपालिका)

प्रथमा—(उपसृत्य) महुअरिए, अवि सुहो दे उज्जाणव्वावारो ।
अपि सुखस्ते उद्यानव्यापारः ।

द्वितीया—अह्मो समाहिदिआ । सहि, सागदं ते ।
अहो समाहितिका । सखि, स्वागतं ते ।

समा०—हला, भगवदि आणवेदि । अरित्तपाणिणा अह्मारिस-
सखि, भगवत्याज्ञापयति । अरिक्तपाणिनास्मादृश-

जणेण तत्तहोदी देवी देक्खिदव्वा । ता बीअपूरएण सुस्सूसिदुं
जनेन तत्रभवती देवी द्रष्टव्या । तद्बीजपूरकेण शुश्रूषितु-

इच्छामित्ति ।
मिच्छामीति ।

मधु०—णं संणिहिदं बीजपूरअं । कहेदि दाव अण्णोण्णसंघरि-
ननु संनिहितं बीजपूरकम् । कथय तावदन्योन्यसंघर्षि-

सिदाणं णट्टा अरिआणं उवदेसं देक्खिअ कदरो भवदीए पसंसिदो ।
तयोर्नाट्याचार्ययोरुपदेशं दृष्ट्वा कतरो भगवत्या प्रशंसितः ।

परिव्राजिकायाः संन्यासिन्याः । उपायनार्थं सभाजनार्थम् । बीजपूरं मातुलिङ्ग-फलम् तपनीयाशोकः रक्ताशोकः । अरिक्तपाणिना अशून्यहस्तेन ।

समा०—दुवेवि किल आअमिणा पओअणिउणा अ। किंतु
द्वावपि किलागमिनौ प्रयोगनिपुणौ च। किंतु
सिस्सागुणविसेसेण उण्णमिदो गणदासो।
शिष्यागुणविशेषेण उन्नमितो गणदासः।

मधु०—अह मालविआगदं कोलीणं किं सुणीअदि।
अथ मालविकागतं कौलीनं किं श्रूयते।

समा०—दिढं किल तस्सिं साहिलासो भट्टा। किंतु केवलं
दृढं किल तस्यां साभिलाषो भर्त्ता। किंतु केवलं
धारिणीए चित्तं रक्खन्तो अत्तणो पहुत्तणं ण दसेदि। मालविआवि इमेसु
धारिण्याश्चित्तं रक्षन्नात्मनः प्रभुत्वं न दर्शयति। मालविकाप्येषु
दिअहेसु अणुहूदमुत्ता विअ मालदीमाला मिलाणा लक्खीअदि। अदो
दिवसेष्वनुभूतमुक्तेव मालतीमाला म्लाना लक्ष्यते। अतः
वरं ण जाणे। विसज्जेहि मं।
परं न जाने। विसृज माम्।

मधु०—एदं साहावलम्बिदं बीअपूरअं गेण्ह।
एतच्छाखावलम्बितं बीजपूरकं गृहाण।

समा०—तह। हला तुमं वि अदो
तथा। (इति नाट्येन बीजपूरकं गृहीत्वा) सखि त्वमप्यतः
पेसलदरं साहुजणसुस्सूसाए फलं पावेहि।
पेशलतरं साधुजनशुश्रूषायाः फलं प्राप्नुहि। (इति प्रस्थिता)

मधु०—हला, समं एव्व गच्छह्म। अहं वि इमस्स चिराअमाण-
सखि, सममेव गच्छावः। अहमप्यस्य चिरायमाण-
कुसुमोग्गमस्स तवणीआसोअस्स दोहलणिमित्तं देवीए विण्णावेमि।
कुसुमोद्गमस्य तपनीयाशोकस्य दोहदनिमित्तं देव्यै विज्ञापयामि।

समा०—जुज्जइ। अहिआरो क्खु तुह।
युज्यते। अधिकारः खलु तव। [इति निष्क्रान्ते]

(इति प्रवेशकः)

लास्यप्रयोगसमर्थौ। कौलीनं लोकवार्ता।

अनुभूतमुक्ता अनुभूय मुक्ता शिरसि परिमलार्थं धृता मुक्ता।

(ततः प्रविशति कामयमानावस्थो राजा विदूषकश्च)

राजा०—(आत्मानं विलोक्य)

शरीरं क्षामं स्यादसति प्रियालिङ्गनसुखे
भवेत्सास्रं चक्षुः क्षणमपि न सा दृश्यत इति।
तया सारङ्गाक्ष्या त्वमसि न कदाचिद्विरहितं
प्रसक्ते निर्वाणे हृदय परितापं वहसि किम् ॥१॥

विदूषकः—अलं भवदो धीरदं उज्झिअ परिदेविदेण। दिट्ठा
अलं भवतो धीरतामुज्झित्वा परिदेवितेन। दृष्टा
मए तत्तहोदीए मालविआए पिअसही बउलावलिआ। सुणाविदा अ तं
मया तत्रभवत्या मालविकायाः प्रियसखी बकुलावलिका। श्राविता च त-
अत्थं जो भवदा संदिट्ठो।
मर्थं यो भवता संदिष्टः।

राजा—ततः किमुक्तवती।

विदू०—विणावेहि भट्टारं। अणुगहीदह्मि इमिणा णिओएण। किंतु सा
विज्ञापय भर्तारम्। अनुगृहीतास्म्यनेन नियोगेन। किं तु सा
तवस्सिणी देवीए अहिअं रक्खीअमाणा णाअरक्खिदो विअ णिही ण
तपस्विनी देव्याधिकं रक्ष्यमाणा नागरक्षित इव निधिर्न
सुहं समासादइदव्वा। तहवि घटइस्सं ति।
सुखं समासादयितव्या। तथापि घटयिष्यामीति।

राजा—भगवन् संकल्पयोने, प्रतिबन्धवत्सु चापि विषयेष्वभि-

शरीरमिति। प्रियालिङ्गनसुखे दयितापरिष्वङ्गसुखे। असति अविद्यमाने। शरीरं वपुः। क्षामं कृशम्। स्यात् भवेत्। क्षणमपि क्षणमात्रमपि। सा मालविका। नदृश्यते इति न लक्ष्यतइति। चक्षुः। सास्रं सबाष्पम्। स्यात्। हे हृदय हे चित्त। सारङ्गाक्ष्या हरिणनेत्रया। तया मालविकया। कदाचित् जातुचित्। विरहितं वियुक्तम्। नासि न भवसि। अतः कारणात्, निर्वाणे सुखे। प्रसक्ते प्रस्तुते सति। किं किमर्थम्। परितापं संतापम्। व्रजसि प्राप्नोषि ॥१॥

प्रतिबन्धवत्सु विघ्नवत्सु। विषयेषु रूपादिभोगेषु।

निवेशकारी किं तथा प्रहरसि यथा जनोऽयं न कालान्तरक्षमो भवति।
(सविस्मयम्)

क्व रुजा हृदयप्रमाथिनी
क्व च ते विश्वसनीयमायुधम्।
मृदु तीक्ष्णतरं यदुच्यते
तदिदं मन्मथ दृश्यते त्वयि ॥२॥

विदू०—णं भणामि तस्सिं साहणिज्ज किदो उवक्खेओत्ति। पज्ज
ननु भणामि तस्मिन्साधनीये कृतः उपक्षेपइति। पर्य्या
वत्थावेदु भवं अप्पाणं।
वस्थापतु भवानात्मानम्।

राजा—अथेमं दिवसशेषमुचितव्यापारविमुखेन चेतसा क नु खलु यापयामि।

विदू०—अज्ज एव्व वसंदपुढमावदारसुहआणि रत्तकुरबआणि उवा
अद्यैव वसन्तप्रथमावतारसुभगानि रक्तकुरबकाण्युपा-
अणं पेसिअ णववसन्तावदारव्ववदेसेण इरावदीए णिउणिआ
यनं प्रेष्य नववसन्तावतारव्यपदेशेनेरावत्या निपुणिका
मुहेण पत्थिदो भवं। इच्छामि अज्जउत्तेण सह दोलाहिरोहणं अणु-
मुखेन प्रार्थितो भवान्। इच्छाम्यार्यपुत्रेण सह दोलाधिरोहणमनु-
हविदुं ति। भवदावि से पडिण्णादं। ता पमदवणं एव्व गच्छह्म।
भवितुमिति। भवताप्यस्यै प्रतिज्ञातम्। तत्प्रमदवनमेव गच्छावः।

राजा—न क्षममिदम्।

विदू०—कहं विअ।
कथमिव।

क्वेति। हृदयप्रमाथिनी चित्तसंक्षोभकारिणी। रुजा व्याधिः। क्व। विश्वसनीयं विश्वस्तम्। आयुधं क्व। मृदु लोके सुकुमारं वस्तु। तीक्ष्णतरम् अत्यन्ततीक्ष्णम् इति यदुच्यते। तदिदं मन्मथ त्वयि दृश्यत इत्यर्थः ॥२॥

साधनीये कर्तव्ये। उपक्षेपः प्रवेशः। उचितव्यापारः राजकार्योपयोगि। रक्ताशोककुरबकाणि तपनीयाशोककुसुमानि च, कुरबककुसुमानि च।

राजा—वयस्य, निसर्गनिपुणाः स्त्रियः। कथमन्यसंक्रान्तहृदय-मुपलालयन्तमपि ते सखी न मां लक्षयिष्यति। अतः पश्यामि।

उचितः प्रणयो वरं विहन्तुं
बहवः खण्डनहेतवो हि दृष्टाः।
उपचारविधिर्मनस्विनीनां
न तु पूर्वाभ्यधिकोपि भावशून्यः ॥३॥

विदू०—णारिहदि भवं अन्तउरपडिट्ठिदं दक्खिणं एक्कपदे पिट्ठदो कादुम्।
नार्हतिभवानन्तःपुरप्रतिष्ठितं दाक्षिण्यमेकपदे पृष्ठतः कर्तुम्।

राजा—(विचिन्त्य) तेन हि प्रमदवनमार्गमादेशय।

विदू०—इदो इदो भवं।
इत इतो भवान्।

(उभौ परिक्रामतः)

विदू०—एदं पमदवणं पवणदरचलाहिं पल्लवङ्गुलीहिं तुवरेदि विअ भवन्तं पवेसिदुं।
एतत्प्रमदवनं पवनदरचलाभिः पल्लवाङ्गुलिभिस्त्वरय तीव भवन्तं प्रवेष्टुम्।

राजा—(स्पर्शसुखं रूपयित्वा) अभिजातः खलु वसन्तः। सखे, पश्य।

उपलालयन्तं प्रसादयन्तम्। न लक्षयिष्यति न ज्ञास्यति।

उचितेति। प्रणयः इरावत्याः प्रणयः प्रार्थना। विहन्तुं प्रतिषेद्धुम्। वरं मनाक् प्रियम्। हि यस्मात्कारणात्। खण्डनहेतवः ईर्ष्याकोपकारणानि। बहवः अनेके। दृष्टाः। भावशून्यः प्रेमरहितः। उपचारविधिः इष्टाचरणम्। पूर्वाभ्यधिकोऽपि पूर्वस्मादुपचारविधेरतिशयितोऽपि। मनस्विनीनां तु प्रशस्तमनसां पुनः। विवेकवतीनामित्यर्थः। उपचारविधिर्न भवति किंतु अपचारविधिरित्यर्थः ॥३॥

पृष्ठतः कर्तुं पश्चात्कर्तुम्।

आमत्तानां श्रवणसुभगैः कूजितैः कोकिलानां
सानुक्रोशं मनसिजरुजः सह्यतां पृच्छतेव ।
अङ्गे चूतप्रसवसुरभिर्दक्षिणो मारुतो मे
सान्द्रस्पर्शः करतल इव व्यापृतो माधवेन ॥४॥

विदू०—पविस णिव्वुदिलाहाअ ।
प्रविश निर्वृतिलाभाय ।

(उभौ प्रविशतः)

विदू०—अवहाणेण दिट्ठिं देहि । एदं खु भवन्तं विअ विलोह
अवधानेन दृष्टिं देहि । एतत्खलु भवन्तमिव विलोभ
इदुकामाए महुलच्छीए जुवइवेसलज्जापइत्तअं वसन्तकुसुमणेवत्थं गहीदं।
यितुकामया मधुलक्ष्म्या युवतिवेषलज्जयितृकं वसन्तकुसुमनेपथ्यं गृहीतम्।

राजा— ननु विस्मयात् एतदवलोकयामि ।

रक्ताशोकरुचा विशेषितगुणो विम्बाधरालक्तकः
प्रत्याख्यातविशेषकं कुरबकं श्यामावदातारुणम् ।

आमत्तानामिति । आमत्तानाम् ईषन्मत्तानाम् । आङ्गीषदर्थोऽभि-व्याप्तौ' कोकिलानां परभृतानाम् । श्रवणसुभगैः श्रुतिसुखैः । कूजितैः शब्दैः । सानुक्रोशं सानुग्रहम् । मनसिजरुजः कामव्यथायाः । सह्यताम् । पृच्छतेव स्थितेन । माधवेन वसन्तेन । चूतप्रसवसुरभिः सहकारकुसुमगन्धिः । दक्षिणो मारुतः दक्षिणदिग्भवो वायुः । अङ्गे देहे । सान्द्रस्पर्शः श्लक्ष्णस्पर्शः । करतलः । व्यापृतइव संपृक्तइव, संचारितइव ॥४॥

निर्वृतिलाभाय सुखप्राप्तये ।

वसन्तकुसुमनेपथ्यम् वसन्तकुसुममेव नेपथ्यम् अलङ्कारः ।

रक्ताशोकेति । बिम्बाधरे बिम्बमिव अधरस्तस्मिन् । विशेषणं विशेष्येण बहुलम् इति समासः । उपमितं व्याघ्रादिभिः सामान्याप्रयोगे इत्यपवादस्तु कविभिरत्र प्रायेण नाङ्गीकृतः । अलक्तकः लाक्षा । रक्ताशोकरुचा रक्ताशोक-कुसुमकान्त्या । विशेषितगुणः विशेषितः अतिशयितः गुणः रागः यस्य सः तथोक्तः । श्यामावदातारुणं श्यामं च अवदातं च अरुणं च तथोक्तम् । वर्णो वर्णेन' इति कर्मधारयसमासः । कुरव्वकं कुरव्वकपुष्पम् । प्रत्याख्यातविशेषकं

आक्रान्ता तिलकक्रिया च तिलकैर्लग्नद्विरेफाञ्जनैः
सावज्ञेव मुखप्रसाधनविधौ श्रीर्माधवी योषिताम् ॥५॥
(उभौ नाट्येनोद्यानशोभां निर्वर्णयतः)
(ततः प्रविशति पर्युत्सुका मालविका)

मालविका—अविण्णाहहिअअं भट्टारं अहिलसन्ती अत्तणो
अविज्ञातहृदयं भर्त्तारमभिलषन्त्यात्मनोऽ
वि दाव लज्जेमि। कुदो विहवो सिणिद्धस्स सहीजणस्स इमं वुत्तन्तं
पि तावल्लज्जे। कुतो विभवः स्निग्धस्य सखीजनस्येमं वृत्तान्त
आचक्खिदुं। ण जाणे अप्पडिआरगुरुअं वेअणां केत्तिअं कालं
माख्यातुम्। न जानेऽप्रतीकारगुरुकां वेदनां कियन्तं कालं
मअणो मं णइस्सदित्ति। (इति कतिचित्पदानि गत्वा) कहिंखु
मदनो मां नेष्यतीति। कुत्र खलु
पत्थिदह्मि। (इति स्मृतिमभिनीय) आदिट्ठह्मि देवीए। गोदमचावलादो
प्रस्थितास्मि। आदिष्टास्मि देव्या। गौतमचापला-
दोलापरिभट्ठाए सरुजा मह चलणा। तुमं दाव गदुअ तवणीअ
द्दोलापरिभ्रष्टायाः सरुजौ मम चरणौ। त्वं तावद्गत्वा तपनीया
सोअस्स दोहलं णिवट्टेहि त्ति। जदि सो पञ्चरत्तब्भन्तरे कुसुमं दंसेदि
शोकस्य दोहदं निवर्तयेति। यद्यसौ पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति
तदो अहं अहिलासपूरइत्तअं पसादं दाइस्सं ति। जाव णिओअभूमिं
ततोहमभिलाषपूरयितृकं प्रसादं दास्यामीति। यावन्नियोगभूमिं

प्रत्याख्यातं तिरस्कृतं विशेषकं पत्रभङ्गो येन तथोक्तम्। लग्नद्विरेफाञ्जनैः लग्नः सक्तः द्विरेफः भ्रमरः एव अञ्जनं येषु तैः। तिलकैः तिलककुसुमैः। तिलकक्रियापि तिलकस्य ललाटिकायाः क्रिया। आक्रान्ता उल्लङ्घिता, परिभूतेत्यर्थः। माधवी मधुसंबन्धिनी। श्रीः शोभा। योषितां स्त्रीणाम्। मुखप्रसाधनविधौ मुखालङ्कारकरणे। सावज्ञेव अवमानसहितेव। अवमाननां कृतवतीवेत्यर्थः ॥५॥

पञ्चरात्राभ्यन्तरे पञ्चरात्रमध्ये। अभिलाषपूरयितृकं प्रियसम्मानदायकम्। प्रसादं परितोषम्। नियोगभूमिं तपनीयाशोकसमीपम्।

पुढमं गदा होमि,ताव अणुपदं मम चलणालंकारहत्थाए बकुलावलिआए
प्रथमं गता भवामि, तावदनुपदं मम चरणालंकारहस्तया बकुलावलिकया
आअन्तव्वं, परिदेवइस्सं तावबीसद्धं मुहुत्तअं।
गन्तव्यम्, परिदेवयिष्यामि तावद्विस्रब्धं मुहूर्तकम्।

(इति परिक्रामति)

विदू०—(दृष्ट्वा) वअस्स,इअं खु सीहुपाणुव्वेजिदस्स मच्छण्डिआ
वयस्य,इयं खलु सीधुपानोद्वेजितस्य मत्स्यण्डिको
उवणदा।
पनता।

राजा—अयि, किमेतत्।

विदू०—एसा खु णादिपज्जेत्तवेसा ऊसुअवअणा एआइणी
एषा खलु नातिपर्याप्तवेषोत्सुकवदनैकाकिनी
मालविआ अदूरे वट्टदि।
मालविकाऽदूरे वर्तते।

राजा—(सहर्षम्) कथं मालविका।

विदू०—अह इं।
अथकिम्।

राजा—शक्यमिदानीं जीवितमवलम्बितुम्।

त्वदुपलभ्य समीपगतां प्रियां
हृदयमुच्छ्वसितं मम विक्लवम्।
तरुवृतां पथिकस्य जलार्थिनः
सरितमारसितादिव सारसात् ॥६॥

प्रथमं गता भवामि 'यावत् पुरानिपातयोर्लट्' इति भविष्यदर्थे लट्।
मत्स्यण्डिका नाम शर्कराविशेषः।

त्वदिति। विक्लवं विवशितम्। मम। तत् हृदयम्। प्रियां मालविकाम्। समीपगताम् आसन्नप्राप्ताम्। उपलभ्य श्रुत्वा। उच्छ्वसितं प्रसन्नम्। जलार्थिनः जलपानेच्छोः पथिकस्य पान्थस्य। तरुवृतां तरुच्छन्नाम्। सरितं कासारम्। आरसितात् शब्दितात्। सारसात् सारसपक्षिणः। आसन्नं जलमिति उपलभ्येव ॥६॥

अथ क्व तत्रभवती ।

विदू०—एसा तरुराइमज्झादो णिक्कन्ता इदो एव्व परिवट्टन्ती
एषा तरुराजिमध्यान्निष्क्रान्तेत एव परिवर्तमाना
दीसइ ।
दृश्यते ।

राजा—(विलोक्य सहर्षम्) वयस्य, पश्यामि ।

विपुलं नितम्बबिम्बे मध्ये क्षामं समुन्नतं कुचयोः ।
अत्यायतं नयनयोर्मम जीवितमेतदायाति ॥७॥

सखे, पूर्वस्मादतिमनोहरमवस्थान्तरमारूढा तत्रभवती । तथाहि

शरकाण्डपाण्डुगण्डस्थलेयमाभाति परिमिताभरणा ।
माधवपरिणतपत्रा कतिपयकुसुमेव कुन्दलता ॥८॥

विदू०—एसावि भवं विअ मअणव्वाहिण परामिट्ठा भविस्सदि ।
(एषापि भवानिव मदनव्याधिना परामृष्टा भविष्यति ।

राजा—सौहार्दमेवं पश्यति ।

माल०—अअं सो ललिअदोहलापेक्खी अग्गहीदकुसुमणेवत्थो
अयं स ललितदोहदापेक्षी अगृहीतकुसुमनेपथ्य
उक्कण्ठिदाए मह अणुकरेदि असोओ । जाव से पच्छायसीदले सिला-
उत्कण्ठिताया ममानुकरोत्यशोकः । यावदस्य प्रच्छायशीतले शिला-
पट्टए णिसण्णा अत्ताणं विणोदेमि ।
पट्टके निषण्णात्मानं विनोदयामि ।

विपुलमिति । नितम्बबिम्बे श्रोण्याम् । विपुलं विशालम् । मध्ये अवलग्ने । क्षामं कृशम् । कुचयोः स्तनयोः । समुन्नतम् । नयनयोः लोचनयोः । अत्यायतम् अतिविस्तृतम् । मम । एतज्जीवितमेव । आयाति ॥७॥

शरेति । शरकाण्डपाण्डुगण्डस्थला शरकाण्डं शरवणदण्डः गण्डयोः स्थलं शरकाण्डवत् पाण्डु धवलं गण्डस्थलं यस्याः सा पाण्डुकपोलेत्यर्थः । परिमिताभरणा अल्पाभरणभूषिता । इयं मालविका । आयाति । कथमिव । माधवपरिणतपत्रा वसन्तागमनजीर्णपर्णा । कतिपयकुसुमा अल्पप्रसूना । कुन्दलताइव ॥८॥

विदू०—सुदं भवदा। उक्कण्ठिदम्हित्ति तत्तहोदीए मन्तिदं।
श्रुतं भवता। उत्कण्ठितास्मीति तत्रभवत्या मन्त्रितम्।

राजा—नैतावता भवन्तं प्रसन्नतर्कं मन्ये। कुतः।

वोढा कुरवकरजसां किसलयपुटभेदशीकरानुगतः।
अनिमित्तोत्कण्ठामपि जनयति मनसो मलयवातः ॥९॥

(मालविकोपविष्टा)

राजा—सखे इतस्तावत्। आवां लतान्तरितौ भवावः।

विदू०—इरावदिं विअ अदूरे समत्थेमि।
इरावतीमिवादूरे समर्थये।

राजा—नहि कमलिनीं दृष्ट्वा ग्राहमवेक्षते मतङ्गजः। (इति विलोकयन् स्थितः)

माल०—हिअअ णिरवलम्बादो अदिभूमिलंघिणो मणोरहादो विरम। किं मं आआसेसि।
हृदय निरवलम्बनादतिभूमिलङ्घिनो मनोरथाद्विरम। किं मामायासयसि।

(विदूषको राजानमवेक्षते)

राजा—प्रिये पश्य वामतां स्नेहस्य।

औत्सुक्यहेतुं विवृणोषि न त्वं तत्वावबोधैकरसो न तर्कः।
तथापि रम्भोरु करोमि लक्ष्यमात्मानमेषां परिदेवितानाम् ॥१०॥

वोढेति। कुरवकरजसां कुरवकपुष्पपरागान्'कर्मणि षष्ठी'। वोढा वहन्। किसलयपुटभेदशीकरानुगतः प्रवालमुकुलविकासनमकरन्दशीकरसहितः। मलयवातः। मनसः चेतसः। अनिमित्तोत्कण्ठां प्रियाविरहरहितस्यापि उत्कण्ठाम् औत्सुक्यं जनयति ॥९॥

मतङ्गजः मत्तगजः। कमलिनीं सरितम्। ग्राहं नक्रम्। नावेक्षते हि न गणयति।

औत्सुक्येति। प्रिये। त्वम्। औत्सुक्यहेतुं विचाराभिलाषकारणं न विवृणोषि न प्रकाशयसि। तर्कः विचारः। तत्वावबोधैकरसः तत्वं तथ्यम् अवबोधज्ञानं सत्यज्ञाने एकरसः मुख्यरसः। न। हे रम्भोरु। तथापि। एषां परिदेवितानां विलापानाम्। आत्मानम्। लक्ष्यं करोमि विलापपात्रमहं भवामि॥१०॥

विदू०—संपदं भवदो णिस्संसअं भविस्सदि । एसा अप्पिद-
सांप्रतं भवतो निःसंशयं भविष्यति । एषार्पित
मअणसंदेसा विविक्ते णं बउलावलिआ उवट्ठिदा ।
मदनसंदेशा विविक्ते एनां बकुलावलिकोपस्थिता ।

राजा—अपि स्मरेदसावस्मदभ्यर्थनाम् ।

विदू०—किं दाणिं एसा दासीए दुहिदा तुह गुरुअं संदेसं
किमिदानीमेषा दास्या दुहिता तव गुरुकं संदेशं
विसुमरेदि । अहं वि दाव ण विसुमरेमि ।
विस्मरति । अहमपि तावन्न विस्मरामि ।

(प्रविश्य चरणालंकारहस्ता)

बकु०—अवि सुहं सहीए ।
अपि सुखं सख्याः ।

माल०—अह्मो बउलावलिआ । सहि साअदं ते । उवविस ।
अहो बकुलावलिका । सखि स्वागतं ते । उपविश ।

बकु०—(उपविश्य) हला तुमं दाणिं जोग्गदाए णिउत्ता । ता
सखि त्वमिदानीं योग्यतया नियुक्ता । तस्मा
एकं चलणं उवणेहि । जाव सालत्तअं सनूउरं च करेमि ।
देकं चरणमुपनय । यावत्सालक्तकं सनूपुरं च करोमि ।

माल०—(आत्मगतम्) हिअअ अलं सुहिदिदाए उवट्ठिदो अअं
हृदय अलं सुखिततया उपस्थितोऽयं
विहवोत्ति । कहं दाणीं अत्ताणं मोचएअं । अहवा एदं एव्व मम
विभव इति । कथमिदानीमात्मानं मोचयेयम् । अथवैतदेव मम
मिच्चुमण्डणं हविस्सदि ।
मृत्युमण्डनं भविष्यति ।

बकु०—किं विआरेसि । ऊसुआ खु इमस्स तवणीआसोअस्स
किं विचारयसि । उत्सुका खल्वस्य तपनीयाशोकस्य
कुसुमुग्गमे देवी ।
कुसुमोद्गमे देवी ।

राजा—कथमशोकदोहदनिमित्तोऽयमारम्भः ।

विदू०—किं णु खु जाणासि तुमं । मह कालणादो देवी इमं अन्ते
किं नु खलु जानासि त्वम् । मम कारणाद्देवीमामन्तः-
उरणेवच्छेण जोअइस्सदित्ति ।
पुरनेपथ्येन योजयिष्यतीति ।

माल०—हला मरिसेहि दाव णं ।
सखि मर्षय तावदेनम् ।

[इति पादमुपहरति]

बकु०—अइ सरीरअंसि मे ।
अयि शरीरमसि मे ।

[इतिनाट्येन चरणसंस्कारमारभते]

राजा—

चरणान्तनिवेशितां प्रियायाः
सरसां पश्य वयस्य रागरेखाम् ।
प्रथमामिव पल्लवप्रसूतिं
हरदग्धस्य मनोभवद्रुमस्य ॥११॥

विदू०—चलणाणुरूवो खु तत्तहोदीए अहिआरो उवक्खित्तो ।
चरणानुरूपः खलु तत्रभवत्या अधिकार उपक्षिप्तः ।

राजा—सम्यगाह भवान् ।

नवकिसलयरागेणाग्रपादेन बाला
स्फुरितनखरुचा द्वौ हन्तुमर्हत्यनेन ।

अन्तःपुरनेपथ्यं देवीनूपराभरणम् ।

चरणेति । हे वयस्य । प्रियायाः । चरणान्तनिवेशितां पादाग्रप्रयुक्ताम् । सरसां सद्रवाम् । रागरेखां लाक्षारसशोणरेखाम् । हरदग्धस्य ईश्वरनयनाग्निदाहितस्य । मनोभुव एव द्रुमः तस्य कामवृक्षस्य । प्रथमां पूर्वमुत्पन्नाम् । पल्लवप्रसूतिं किसलयाङ्कुरमिव ॥११॥

उपक्षिप्तः दत्तः ।

नवेति । बाला । नवकिसलयरागेण प्रत्यग्रप्रवालशोभितेन । स्फुरितनख-रुचा विलसन्नखकान्तियुक्तेन । अनेन अग्रपादेन पादाग्रेण । हन्तुं प्रहर्तुम् । द्वौ ।

अकुसुमितमशोकं दोहदापेक्षया वा
प्रणमितशिरसं वा कान्तमार्द्रापराधम् ॥१२॥

विदू०—पहरिस्सदि तत्तहोदी तुमं अवरद्धम्।
प्रहरिष्यति तत्रभवती त्वामपराद्धम्।

राजा—प्रतिगृहीतं वचः सिद्धिदर्शिनो ब्राह्मणस्य।

(ततः प्रविशति युक्तमदा इरावती चेटी च)

इरा०—हञ्जे णिउणिए सुणोभि बहुसो मदो किल इत्थिआजणस्स
चेटि निपुणिके शृणोभि बहुशो मदः किल स्त्रीजनस्य
विसेसमण्डणं ति। अवि सच्चो लोअवाओ अअं।
विशेषमण्डनमिति। अपि सत्यो लोकवादोऽयम्।

निपु०—पढमं लोअवाओ एव्व। अज्ज सच्चो संवुत्तो।
प्रथमं लोकवाद एव। अद्य सत्यः संवृत्तः।

इरा—संकित्तणसंसिणा अलं सिणेहेण। कहेहि कुदो दाणिं
संकीर्तनशंसिनालं स्नेहेन। कथय कुत इदानी
अवगदं घरं पुढमं गदो भट्टोत्ति।
मवगतं दोलागृहं प्रथमं गतो भर्तेति।

निपु०—भट्टिणीए अखण्डिदादो पणआदो।
भट्टिन्या अखण्डितात्प्रणयात्।

इरा०—अलं सेवाए। मज्झत्थदं परिगहिअ भणाहि।
अलं सेवया। मध्यस्थतां परिगृह्य भण।

निपु०—वसन्तोवाअणलोलुवेण अज्जगोदमेण कहिअं। तुवरदु
वसन्तोपायनलोलुपेनार्यगौतमेन कथितम्। त्वरतां
भट्टिणी।
भट्टिनी।

इरा०—(अवस्थासदृशं परिक्रम्य) हञ्जे मदेण किलाभिअमाणं
चेटि मदेन क्लाम्यमान

अर्हति प्राप्ता भवति। अकुसुमितम् अपुष्पितम् अशोकं च। दोहदापेक्षया दोहदप्राप्तये। आर्द्रापराधं प्रत्यग्रापराधम्। प्रणिहितशिरसं पादतले निहितशिरसं कान्तं नायकं च। द्वौ हन्तुमर्हतीति ॥१२॥

अत्ताणं अज्जउत्तदंसणे हिअअं तुवरेदि। चलणा उण ण मग्गे पसरन्ति।
मात्मानमार्यपुत्रदर्शने हृदयं त्वरयति। चरणौ पुनर्न मार्गे प्रसरतः।

निपु०—णं पत्तह्म दोलाघरं।

नन्तु प्राप्ते स्वो दोलागृहम्।

इरा०—णिउणिए ण एत्थ अज्जउत्तो दीसहि।

निपुणिके नात्र आर्यपुत्रो दृश्यते।

निपु०—भट्टणीए ओलोअदु। परिहासणिमित्तं कहिं वि· गूढेण

भट्टिन्यत्रलोकयतु। परिहासनिमित्तं कुत्रापि गूढेन
भत्तुणा होदव्वं। इमं पिअङ्गुलदापरिक्खित्तं असोअसिलापट्टअं
भर्त्रा भवितव्यम्। इमं प्रियङ्गुलतापरिक्षिप्तमशोकशिलापट्टक
अम्हे वि पविसामो।
मावामपि प्रविशावः।

इरा०—(तथा करोति)

निपु०—(विलोक्य) ओलोअदु भट्टिणी। चूदङ्कुरं विचिण्णन्तीणं

अवलोकयतु भट्टिनी। चूताङ्कुरं विचिन्वत्योः
पिवीलिआहिं दंसिदं।
पिपीलिकाभिर्दष्टम्।

इरा०—कहं विअ।

कथमिव।

निपु०—एसा बउलावलिआ असोअपाअवच्छाआए मालविआए

एषा बकुलावलिका अशोकपादपच्छायायां मालविकायाः
चलणालंकारं णिव्वट्टेदि।
चरणालङ्कारं निवर्तयति।

इरा०—(शङ्कां रूपयित्वा) अभूमी इअं मालविआए। कहं एत्थ

अभूमिरियं मालविकायाः। कथमत्र
तक्केसि।
तर्कयसि।

पिपीलिकाभिर्दष्टं राजानं मार्गमाणयोरावयोर्मालविकादर्शनं पिपीलिकासम मित्यर्थः।

निपु०—तक्केमि दोलापरिब्भट्टाए सरुअचलणाए देवीए
तर्कयामि दोलापरिभ्रष्टया सरुजचरणया देव्या
असोअदोहलाहिआरे मालविआ णिउत्तेत्ति। अण्णहा कहं देवी सअं
अशोकदोहदाधिकारे मालविका नियुक्तेति। अन्यथा कथं देवी स्वयं
धारिअं णूउरजुउलं परिअणस्स अणुजाणिस्सदि।
धारितं नूपुरयुगलं परिजनस्यानुज्ञास्यति।

इरा०—महदी क्खु से संभावणा।
महती खल्वस्याः संभावना।

निपु०—किं उण ण अण्णेसीअदि भट्टा।
किं पुनर्नान्विष्यते भर्ता।

इरा०—हञ्जे ण मे चलणा अण्णदो पवट्टन्ति। मणो मह किंवि
हञ्जे न मे चरणावन्यतः प्रवर्तेते। मनो मम किमपि
विआरेदि। आसङ्किदस्स दाव अन्तं गमिस्सं। (इति मालविकां
विकारयति। आशङ्कितस्य तावदन्तं गमिष्यामि।
निर्वर्ण्य आत्मगतम्) **ठाणे क्खु कादरं मे हिअअं।**
स्थाने खलु कातरं मे हृदयम्।

बकु०—(मालविकायै चरणं दर्शयन्ती) **अवि रोअदि ते राअरेहा-**
अपि रोचते ते रागरेखा-
विण्णासो।
विन्यासः।

माल०—हला अत्तणो चलण गदोत्ति लज्जेमि णं पसंसिदुं। केण
सखि आत्मनश्चरणगत इति लज्जे एनं प्रशंसितुम्। केन
पसाहणकलाए अहिविणीदासि।
प्रसाधनकलायामभिविनीतासि।

बकु०—एत्थ अहं भत्तुणो सीसह्मि।
अत्राहं भर्तुः शिष्यास्मि।

विदू०—तुवरेहि दाव णं गुरुदक्खिणाए।
त्वरय तावदेनां गुरुदक्षिणायै।

मालo—दिट्ठिआ ण गव्विदासि ।
दिष्ट्या न गर्वितासि ।

बकुo—उवदेसाणुरूवा चलणा लम्भिअ अज्ज गव्विदा भविस्सं ।
उपदेशानुरूपौ चरणौ लब्ध्वाद्य गर्विता भविष्यामि ।
(आत्मगतम्) हन्त सिद्धं मे दोच्चं । (रागं विलोक्य । प्रकाशम्) सहि
हन्त सिद्धं मे दौत्यम् । सखि,
एक्कस्स दे चलणस्स अवसिदो राअणिक्खेवो । केवलं मुहमारुदो
एकस्य ते चरणस्यावसितो रागनिक्षेपः । केवलं मुखमारुतो
लम्भइदव्वो । अहवा पवादं एव्व एदं ठाणं ।
लम्भयितव्यः । अथवा प्रवातमेवैतत्स्थानम् ।

राजा—सखे पश्य पश्य ।

आर्द्रालक्तकमस्याश्चरणं मुखमारुतेन वीजयितुम् ।
प्रतिपन्नः प्रथमतरः संप्रति सेवावकाशो मे ॥१३॥

विदूo—कुदो दे अणुसओ । चिरं भवदा एदं कमेण अणुहवि
कुतस्तेऽनुशयः । चिरं भवता एतत्क्रमेणानुभवि-
दव्वं ।
तव्यम् ।

बकुo—सहि अरुणसदपत्तं विअ सोहदि दे चलणो । सव्वहा
सखि अरुणशतपत्रमिव शोभते ते चरणः । सर्वथा
भत्तुणो अङ्कपरिवट्टिणी होहि ।
भर्तुरङ्कपरिवर्तिनी भव ।

(इरावती निपुणिकामवेक्षते)

राजा—ममेयमाशीः ।

मालo—हला अवअणीअं मन्तेसि ।
सखि अवचनीयं मन्त्रयसे ।

आर्द्रेति । अस्याः मालविकायाः । आर्द्रालक्तकं द्रवालक्तकम् । चरणं पादम् । मुखमारुतेन मुखवायुना । वीजयितुं शोषणार्थं फूत्कारवायुं कर्तुम् । मे मम । प्रथमतरः श्रेष्ठतरः । सेवावकाशः सेवावसरः । प्रतिपन्नः प्राप्तः ॥१३॥

बकु०—मन्तइद्व्वं एव्व मए मन्तिदं ।
मन्त्रयितव्यमेव मया मन्त्रितम् ।

माल०—पिआ खु अहं तव ।
प्रिया खल्वहं तव ।

बकु०—ण केवलं मह ।
न केवलं मम ।

माल०—कस्स वा अण्णस्स ।
कस्य वान्यस्य ।

बकु०—गुणेसु अहिणिवेसिणो भत्तुणो वि ।
गुणेष्वभिनिवेशिनो भर्तुरपि ।

माल०—अलीअं मन्तेसि । एदं एव्व मइ णत्थि ।
अलीकं मन्त्रयसे । एतदेव मयि नास्ति ।

बकु०—सच्चं तुइ णत्थि । भत्तुणो किसेसु ईसिपरिपण्डुरेसु दीसइ अङ्गेसु ।
सत्यं त्वयि नास्ति । भर्तुः कृशेषु ईषत्परिपाण्डुरेषु दृश्यतेऽङ्गेषु ।

निपु०—पुढमं गणिदं विअ हदासाए उत्तरं ।
प्रथमं गणितमिव हताशाया उत्तरम् ।

बकु०—अणुराओ अणुराएण पच्चेट्ठव्वो त्ति सुअणवअणं पमाणीकरेहि ।
अनुरागोऽनुरागेण प्रत्येष्टव्य इति सुजनवचनं प्रमाणीकुरु ।

माल०—किं अत्तणो छन्देण मन्तेसि ।
किमात्मनश्छन्देन मन्त्रयसे ।

बकु०—णहि णहि । भत्तुणो खु एदाइं पणअमिदुआइं अक्खराइं वत्तन्तरिदाइं ।
नहि नहि । भर्तुः खल्वेतानि प्रणयमृदुकान्यक्षराणि वक्त्रान्तरितानि ।

ईषत्पाण्डुरेषु दरपाण्डुरेषु ।

माल०—हला देविं विचिन्तिअ ण मे हिअअं विस्ससदि ।
सखि देवीं विचिन्त्य न मे हृदयं विश्वसिति ।
बकु०—मुद्धे भमरसंबाधोत्ति वसन्तावदारसव्वस्सं किं ण
मुग्धे भ्रमरसंबाध इति वसन्तावतारसर्वस्वं किं न
चूदप्पसवो ओदंसिदव्वो ।
चूतप्रसवोऽवतंसयितव्यः ।
माल०—तुमं दाव दुज्जादे अच्चन्तं सहाया होहि ।
त्वं तावद् दुर्जातेऽत्यन्तं सहाया भव ।
बकु०—विमद्दसुरही बउलावलिआ खु अहं ।
विमर्दसुरभिर्बकुलावलिका खल्वहम् ।
राजा—साधु बकुलावलिके साधु ।

भावज्ञानानन्तरं प्रस्तुतेन
प्रत्याख्याने दत्तयुक्तोत्तरेण ।
वाक्येनेयं स्थापिता स्वे निदेशे
स्थाने प्राणाः कामिनां दूत्यधीनाः ॥१४॥

इरा०—हञ्जे पेक्ख । कारिदा एव्व बउलावलिआए एदस्सिं पदं
हञ्जे पश्य । कारितैव बकुलावलिकयैतस्मिन् पदं
मालविआ ।
मालविका ।
निपु०—भट्टिणि णिव्विआरस्सवि उस्सुअदाजणओ उवदेसो ।
भट्टिनि निर्विकारस्याप्युत्सुकताजनक उपदेशः ।

दुर्जाते व्यसने ।

भावेति । 'अलीकं मन्त्रयसे, एतदेव मयि नास्ति' इत्यादिना मालविका-भावोज्ञातः । तदनन्तरं प्रस्तुतं बकुलावलिकावाक्यम् 'अनुरागोऽनुरागेण प्रत्येष्टव्यः' इत्यादिना तस्य प्रत्याख्यानं किमात्मनश्छन्देन इत्यादिना । तस्य 'भर्तुः खल्वेतानि' इत्यादि युक्तोत्तरं तद्वता तेन वाक्येन स्वे निदेशे स्थापिता मालविकेति यत्, तेन, कामिनां प्राणाः दूत्यधीना इति यदुच्यते, तत् स्थाने युक्तम् ॥१४॥

इरा०—ठाणे खु संकिदं मे हिअअं। गहीदत्था अणन्तरं चिन्तइस्सं।
स्थाने खलु शङ्कितं मे हृदयम्। गृहीतार्थानन्तरं चिन्तयिष्यामि।
बकु०—एसो दुदीओवि दे णिव्वुत्तपरिकम्मा चलणो। जाव
एष द्वितीयोऽपि ते निर्वृत्तपरिकर्मा चरणः। यावद्
दुवेवि सणूउरे करेमि। (इति नाट्येन नूपरयुगलमामुच्य) हला उट्ठेहि
द्वावपि सनूपुरौ करोमि। हला उत्तिष्ठ
अणुचिट्ठ देवीए असोअविआसइत्तअं णिओअं।
अनुतिष्ठ देव्या अशोकविकासयितृकं नियोगम्।
(उभे उत्तिष्ठतः)
इरा—सुदो देवीए णिओओ। होदु दाणिं।
श्रुतो देव्या नियोगः। भवत्विदानीम्।
बकु—एसो उवारूढराओ उअभोअक्खमो पुरदो दे वट्टइ।
एष उपारूढराग उपभोगक्षमः पुरतस्ते वर्तते।
माल०—(सहर्षम्) किं भट्टा।
किं भर्ता।
बकु०—(सस्मितम्) ण दाव भट्टा। एसो असोअसाहावलम्बी
न तावद्भर्ता। एषोऽशोकशाखावलम्बी
पल्लवगुच्छओ। ओदंसेहि णं।
पल्लवगुच्छकः। अवतंसयैनम्।
विदू०—अवि सुदं भवदा।
अपि श्रुतं भवता।
राजा—सखे पर्याप्तमेतावता कामिनाम्।

अनातुरोत्कण्ठितयोः प्रसिध्यता
समागमेनापि रतिर्न मां प्रति।

एतत् पदम् एष व्यवसायः। 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इति। उपारूढरागः गृहीतस्नेहः। उपभोगक्षमः संभोगक्षमः।

अनातुरेति। अनातुरोत्कण्ठितयोः अनातुरः अनार्तः कामोत्कण्ठारहित इत्यर्थः। प्रसिध्यता संभवता। समागमेनापि संपर्केणापि। मां प्रति माम्

परस्परप्राप्तिनिराशयोर्वरं
शरीरनाशोऽपि समानुरागयोः ॥१५॥

(मालविका रचितपल्लवावतंसा सलीलं पादमशोकाय प्रहिणोति)

राजा—वयस्य ।

आदाय कर्णकिसलयमस्मादियमत्र चरणमर्पयति ।
उभयोः सदृशविनिमयादात्मानं वञ्चितं मन्ये ॥१६॥

माल०—अवि णाम अह्माणं सम्भावना सफला भवे ।
अपि नाम आवयोः सम्भावना सफला भवेत् ।

बकु०—हला णत्थि दे दोसो । णिग्गुणो अअं असोओ जइ
सखि नास्ति ते दोषः । निर्गुणोऽयमशोको यदि
कुसुमुब्भेदमन्थरो हवे जो इरिसं चलणसक्कारं लहेहि ।
कुसुमोद्भेदमन्थरो भवेद्य ईदृशं चरणसत्कारं लभते ।

राजा—

अनेन तनुमध्यया मुखरनूपुराराविणा
नवाम्बुरुहकोमलेन चरणेन संभावितः ।
अशोक यदि सद्य एव कुसुमैर्न संपत्स्यसे
वृथा वहसि दोहदं ललितकामिसाधारणम् ॥१७॥

अनु, मत्पक्ष इत्यर्थः ।. रतिः शृङ्गारः न भवति एकानुरागस्य रसाभासत्वात् ।

आदायेति । अस्मात् अशोकात् । कर्णकिसलयं कर्णपूरम् । आदाय गृहीत्वा । इयं मालविका । अत्र अशोके । चरणं पादम् । अर्पयति । उभयोः । सदृशविनिमयात् अशोकचरणयोस्सादृश्यत्वात् । आत्मानं वञ्चितं मन्ये ॥१६॥

कुसुमोद्भेदमन्थरः कुसुमदर्शनमन्दः योऽयमशोक ईदृशचरणसत्कारं लभते स यदि कुसुमोद्भेदमन्थरो भवेत् नैष ते दोषः । अयमशोको निर्गुणः विरस इत्यर्थः ।

अनेनेति । तनुमध्यया कृशोदर्या । मुखरनूपुराराविणा वाचालमञ्जीरशब्द-सहितेन । नवाम्बुरुहकोमलेन सद्यो विकसितसरोजवन्मनोहरेण । अनेन चरणेन । संभावितः स्पृष्टः । त्वम् । अशोक । सद्यः झटित्येव । मुकुलैः कुसुमैः । न संपत्स्यसे न जनिष्यसे यदि । ललितकामिसाधारणं शृङ्गारविलासियुवसमुदाय साधारणम् । दोहदम् आर्तवसूनम् । वृथा वहसि निरर्थकं वहसि ॥१७॥

सखे वचनावसरपूर्वकं प्रवेष्टुमिच्छामि ।

विदू०—एहि । णं परिहासइस्सं ।

एहि । एनां परिहासयिष्यामि ।

(उभौ प्रवेशं कुरुतः)

निपु०—भट्टिणि भट्टा एत्थ पविसदि ।

भट्टिनि भर्तात्र प्रविशति ।

इरा०—एव्वं पुढमं मम चिन्तिदं हिअएण ।

एवं प्रथमं मम चिन्तितं हृदयेन ।

विदू०—(उपसृत्य) होदि जुत्तं णाम अत्तहोदो पिअवअस्सो अअं

भवति युक्तं नाम अत्रभवतः प्रियवयस्योऽयम

असोओ वामपादेण ताडिदुं ।

शोकः वामपादेन ताड़यितुम् ।

उभे—(ससंभ्रमम्) अह्मो भट्टा ।

अहो भर्ता ।

विदू०—बउलावलिए गहीदत्थाए तुए अत्तहोदी ईरिसं अविणअं

बकुलावलिके गृहीतार्थया त्वयात्रभवतीदृशमविनयं

करन्ती कीस ण णिवारिदा ।

कुर्वती कस्मान्न निवारिता ।

(मालविका भयं रूपयति)

निपु०—भट्टिणि पेक्ख । किं पउत्तं अज्जगोदमेण ।

भट्टिनि पश्य । किं प्रवृत्तमार्यगौतमेन ।

इरा०—कहं खु बह्मबन्धु अण्णहा जीविस्सदि ।

कथं खलु ब्रह्मबन्धुरन्यथा जीविष्यति ।

बकु०—अज्ज एसा देवीए णिओअं अणुचिट्ठदि । एदस्सिं

आर्य एषा देव्या नियोगमनुतिष्ठति । एतस्मि

अदिक्कमे परवदी इअं । पसीददु भट्टा ।

न्नतिक्रमे परवतीयम् । प्रसीदतु भर्ता ।

(इत्यात्मना सहैनां प्रणिपातयति)

राजा—यद्येवमनपराद्धासि । उत्तिष्ठ भद्रे (इति हस्तेनगृहीत्वैनामुत्थापयति)

विदू०—जुज्जइ। देवी एत्थ माणइदव्वा।

युज्यते। देव्यत्र मानयितव्या।

राजा—

किसलयमृदोर्विलासिनि कठिने निहितस्य पादपस्कन्धे।

चरणस्य न ते बाधा संप्रति वामोरु वामस्य ॥१८॥

(मालविका लज्जां नाटयति)

इरा०—अहो णवणीदहिअओ अज्जउत्तो।

अहो नवनीतहृदय आर्यपुत्रः।

माल०—बउलावलिए एहि। अनुट्ठिदं अत्तणो णिओअं देविए णिवेदेह्म।

बकुलावलिके एहि। अनुष्ठितमात्मनो नियोगं देव्यै निवेदयावः।

बकु०—तेण हि विण्णावेहि भट्टारं विसज्जेहित्ति।

तेन हि विज्ञापय भर्तारं विसर्जयेति।

राजा—भद्रे यास्यसि। ममतावदुत्पन्नावसरमर्थित्वं श्रूयताम्।

बकु०—अवहिदा सुणाहि। आणवेदु भट्टा।

अवहिता शृणु। आज्ञापयतु भर्ता।

राजा—

धृतिपुष्पमयमपि जनो बध्नाति न तादृशं चिरात्प्रभृति।

स्पर्शामृतेन पूरय दोहदमस्याप्यनन्यरुचेः ॥ १९ ॥

इरा०—(सहसोपसृत्य) पूरेहि पूरेहि। णं असोओ कुसुमं दंसेदि।

पूरय पूरय। ननु अशोकः कुसुमं दर्शयति।

किसलयेति। हे विलासिनि। कठिने पादपस्कन्धे कठिने विटपे। निहितस्य। किसलयमृदोः। ते। वामस्य चरणस्य वामपादस्य। वामोरु। संप्रति। बाधा व्यसनं न नह्यपि ॥१८॥

धृतीति। अयमपि जनः अहमपि। चिरात्प्रभृति अनेककालमारभ्य। तादृशं तत्सदृशम्। धृतिपुष्पं प्रियसूनम्। न बध्नाति। अयमशोक इव चिरकालेनापि न बध्नातीत्यर्थः। अनन्यरुचेः अन्यासु न रुचेः अनन्याभिलाषिणः। अस्य मम। दोहदं वाञ्छाम्। स्पर्शामृतेन आलिङ्गनादिस्पर्शरसेन ॥१९॥

अअं उण पुप्फदि फलदि अ ।
अयं पुनः पुष्प्यति फलति च ।

(सर्वे इरावतीं दृष्ट्वा सम्भ्रान्ताः)

राजा—(अपवार्य) वयस्य का प्रतिपत्तिरत्र ।

विदू०—किं अणं । जङ्घाबलं एव्व ।
किमन्यत् । जङ्घाबलमेव ।

इरा०—बउलावलिए साहु तुए उवक्कन्तं । मालविए तुमं दाव
बकुलावलिके साधु त्वयोपक्रान्तम् । मालविके त्वं तावत्
सफलपत्थणं करेहि अज्जउत्तं ।
सफलप्रार्थनं कुर्वार्यपुत्रम् ।

उभे—पसीददु भट्टिणी । का अह्मे भत्तुणो पणअपरिग्गहस्स ।
प्रसीदतु भट्टिनी । के आवां भर्तुः प्रणयपरिग्रहस्य ।

(इति निष्क्रान्ते)

इरा०—अविस्ससणीया पुरिसा । मए क्खु अत्तुणो वञ्चणावअणं
अविश्वसनीयाः पुरुषाः । मया खलु आत्मनो वञ्चनावचनं
पमाणीकरिअ वाहगीदरत्ताए हरिणीए विअ असङ्किदाए एदं ण विण्णादं ।
प्रमाणीकृत्य व्याधगीतरक्तया हरिण्येवाशङ्कितयैतन्न विज्ञातम् ।

विदू०—(जनान्तिकम्) पडिजोएहि दाणिं किंपि । कम्मग्गहीदेण
प्रतियोजयेदानीं किमपि । कर्मगृहीतेन
कुम्भीलएण संधिच्छेदे सिक्खिओम्मित्ति वत्तव्वं होदि ।
कुम्भीलकेन संधिच्छेदे शिक्षितोऽस्मीति वक्तव्यं भवति ।

राजा—सुन्दरि न मे मालविकया कश्चिदर्थः । मया त्वं चिरय-
सीति यथा कथंचिदात्मा विनोदितः ।

इरा०—विस्ससणीओसि । मए ण विण्णादं ईरिसं विणोदवत्थु
विश्वसनीयोऽसि । मया न विज्ञातमीदृशं विनोदवस्तु

जङ्घाबलं धावनम् । कर्मगृहीतेन कर्मणि चौर्यकर्मणि गृहीतेनापि । कुम्भी-
लकेन चौरेण । सन्धिच्छेदे पिहितभूमिः सन्धिस्तस्य छेदने भेदने । सुरङ्गकरणे
इत्यर्थः शिक्षितः अभ्यस्तः अस्मि इति वक्तव्यं भवति । किमपि प्रतियोजय
उपपन्नम् अनुपपन्नं वा उत्तरं कुर्वित्यर्थः ।

अज्जउत्तेण उवलद्धंति । अण्णहा मन्दभाइणीए एव्वं ण करीअदि ।
आर्यपुत्रेणोपलब्धमिति । अन्यथा मन्दभागिन्यैवं न क्रियते ।

विदू०—मा दाव अत्तहोदी अत्तहोदो दक्खिणस्स उअरोहं भणदु ।
मा तावदत्रभवती अत्रभवतो दाक्षिण्यस्योपरोधं भणतु ।
समावत्तिदिट्ठेण देवीए परिअणेण संकहा वि जइ अवराहो ठाविअदि
समापत्तिदृष्टेन देव्याः परिजनेन संकथापि यदि अपराधः स्थाप्यते
एत्थ तुमं एव्व पमाणं ।
अत्र त्वमेव प्रमाणम् ।

इरा०—णं संकहा णाम होदु । किंति अत्ताणं आआसइस्सं ।
ननु संकथा नाम भवतु । किमित्यात्मानमायासयिष्यामि ।
(इति रुषा प्रस्थिता)

राजा—(अनुसरन्) प्रसीदतु भवती ।
(इरावती रशनासंदितचरणा व्रजत्येव)

राजा—सुन्दरि न शोभते प्रणयिनि जने निरपेक्षता ।

इरा०—सठ अविस्ससणीअहिअओसि ।
शठ अविश्वसनीयहृदयोऽसि ।

राजा—

शठ इति मयि तावदस्तु ते
परिचयवत्यवधीरणा प्रिये ।
चरणपतितया न चण्डि तां
विसृजसि मेखलयापि याचिता ॥ २० ॥

समापत्तिदृष्टेन, यदृच्छादृष्टेन । रशनासंदितं मेखलाबद्धम् ।

शठइति । हे प्रिये । परिचयवति परिचयः प्रशस्तः यस्य सः परिचयवान् तस्मिन् अतिशायने मतुप् । मयि । शठ इति गूढविप्रियकर इति । अवधीरणा तिरस्कारः अस्तु । यतः अतिपरिचयादवज्ञेति वदन्ति तस्मादियमवधीरणा युक्तेति भावः । हे चण्डि अत्यन्तकोपने । चरणपतितया । मेखलया । याचिता प्रार्थितापि । ताम् अवधीरणाम् । न विसृजसि किमिदं युक्तमिति शेषः ॥२०॥

इरा०—इअं पिं हदासा तुमं एव्व अणुसरदि ।
इयमपि हताशा त्वामेवानुसरति ।
(इति रशनामादाय राजानं ताडयितुमिच्छति)

राजा—इयमिरावती ।

बाष्पासारा हेमकाञ्चीगुणेन
श्रोणीबिम्बादव्यपेक्षांच्युतेन ।
चण्डी चण्डं हन्तुमभ्युद्यता मां
विद्युद्दाम्ना मेघराजीव विन्ध्यम् ।। २१ ।।

इरा०—किं मं एव्वं भूओ वि अवरद्धं करेसि ।
किं मामेवं भूयोप्यपराद्धां करोषि ।
(इति सरशनं हस्तमवलम्बयति)

राजा—

अपराधिनि मयि दण्डं संहरसि किमुद्यतं कुटिलकेशि ।
वर्धयसि विलसितं त्वं दासजनायात्र कुप्यसि च ।।२२।।

नूनमिदमनुज्ञातम् । (इति पादयोः पतति)

इरा०—ण खु इमे मालविआचलणा,जा दे हरिसदोहलं पूरइस्सन्ति।
न खल्विमौ मालविकाचरणौ, यौ ते हर्षदोहदं पूरयिष्यतः ।
(इति निष्क्रान्ता सचेटी)

विदू०—उठेहि । किदप्पसादोऽसि ।
उत्तिष्ठ । कृतप्रसादोऽसि ।

बाष्पेति । बाष्पासारा अश्रुवर्षा । श्रोणिबिम्बात् नितम्बबिम्बात् । अव्यपेक्षाच्युतेन कोपप्रस्थानव्यागलितेन । हेमकाञ्चीगुणेन । चण्डी अत्यन्तकोपना । चण्डम् माम् । हन्तुम् अभ्युद्यता प्रहर्तुमुद्यता । कथमिव, मेघराजी मेघमाला । विद्युद्दाम्ना सौदामिनीगुणेन । विन्ध्यं पर्वतमिव ।।२१।।

अपराधिनीति । हे कुटिलकेशि अरालकेशि । अपराधिनि कृतापराधे । मयि । उद्यतम् उद्योगितम् । दण्डम् आज्ञाम् । कथं संहरसि किमर्थं निवर्तयसि । विलसितं विलासम् । वर्धयसि । त्वं दासजनाय किङ्करजनाय । कुप्यसि च क्रुद्धासि च ।।२२।। अनुवक्रम् प्रतीपम् ।

राजा—(उत्थाय इरावतीमपश्यन्) कथं गतैव प्रिया ।

विदू०—वअस्य दिट्ठिआ इमस्स अविणअस्स अप्पसण्णा गदा एसा
वयस्य दिष्ट्या अनेनाविनयेनाप्रसन्ना गतैषा
ता वअं सिग्घं अवक्कमाम । जाव अङ्गारओ रासिं विअ अणुवक्कं
तद्वयं शीघ्रमपक्रमामः । यावदङ्गारको राशिमिवानुवक्रं
पदिगमणं ण करेदि ।
प्रतिगमनं न करोति ।

राजा—अहो मदनस्य वैषम्यम् ।

मन्ये प्रियाहृतमनास्तस्याः प्रणिपातलङ्घनं सेवाम् ।
एवं हि प्रणयवती सा शक्यमुपेक्षितुं कुपिता ॥२३॥

(इति निष्क्रान्तः सह वयस्येन ।)

इति तृतीयोऽङ्कः ।

मन्य इति । प्रियाहृतमनाः मालविकाहृतमनाः । प्रणिपातलङ्घनं प्रणामातिक्रमम् । तस्याः इरावत्याः । सेवाम् अनुकूलाचरणम् । मन्ये । सेवायाः फलमाह । कुपिता क्रुद्धा । प्रणयवती प्रेमवती । एवम् अनेन प्रकारेण प्रणिपातलङ्घनरूपेण । उपेक्षितुम् औदासीन्येन वर्तितुम् । शक्यं हि शक्या खलु । शक्यमिति निपातः ॥२३॥

चतुर्थोऽङ्कः ।

(ततः प्रविशति पर्युत्सुको राजा प्रतीहारी च)

राजा—(आत्मगतम्)

तामाश्रित्य श्रुतिपथगतामास्थया बद्धमूलः
संप्राप्तायां नयनविषयं रूढरागप्रवालः ।
हस्तस्पर्शे मुकुलित इव व्यक्तरोमोद्गमत्वात्
कुर्यात्क्लान्तं मनसिजतरुर्मां रसज्ञं फलस्य ॥१॥

(प्रकाशम्) सखे गौतम ।

प्रतीहारी—जेदु भट्टा । असंणिहिदो गोदमो ।
जयतु भर्ता । असंनिहितो गौतमः ।

राजा—(आत्मगतम्) आम् । मालविकावृत्तान्तज्ञानाय मया प्रेषितः ।

(प्रविश्य)

विदूषकः—वड्ढदु भवं ।
वर्धतां भवान् ।

राजा—जयसेने जानीहि तावत्क देवी धारिणी कथं वा सरुजचरणत्वाद्विनोद्यत इति ।

प्रती०—जं देवो आणवेदि । [इति निष्क्रान्ता]
यद्देव आज्ञापयति ।

राजा—सखे को वृत्तान्तस्तत्रभवत्यास्ते सख्याः ।

तामिति । तां मालविकाम् । श्रुतिपथगतां कर्णमार्गप्रविष्टाम् । आश्रित्य ज्ञात्वा । आस्थया वाञ्छया । बद्धमूलः प्राप्ताङ्घ्रिः रूढमूलः । नयनविषयं नयनगोचरं दृष्टिपथम् । संप्राप्तायां समागतायां सत्याम् । रूढरागप्रवालः उद्भूताभिलाषपल्लवः । हस्तस्पर्शैः देहसंसर्गैः । व्यक्तरोमोद्गमत्वात् दृष्टरोमाञ्चत्वात् । मुकुलित इव संजतमुकुल इव । एवंभूतः मनसिजतरुः कन्दर्पवृक्षः । क्लान्तं विरहव्यथितम् । माम् । फलस्य बीजस्य । रसज्ञम् अधरामृतरसज्ञम् । कुर्यात् किम् ॥१॥

विदू०—जो विडालगहीदाए परहुदिआए ।
यो विडालगृहीतायाः परभृतिकायाः ।

राजा—(सविषादम्) कथमिव ।

विदू०—सा खु तवस्सिणी ताए पिङ्गलच्छीए सारभाण्डभूघरए
सा खलु तपस्विनी तया पिङ्गलाक्ष्या सारभाण्डभूगृहे
मिच्चुमुहे विअ णिक्खित्ता ।
मृत्युमुखे इव निक्षिप्ता ।

राजा—ननु मत्संपर्कमुपलभ्य ।

विदू०—अह इं ।
अथ किम् ।

राजा—क एवंविमुखोऽस्माकं येन चण्डीकृता देवी ।

विदू०—सुणादु भवं । परिव्वाजिआए मे कहिदं । हिओ किल
शृणोतु भवान् । परिव्राजिकया मे कथितम् । ह्यः किल
तत्तहोदी इरावदी रुजाअक्कन्तचलणं देविं सुहं पुच्छिदुं आअदा ।
तत्रभवतीरावती रुजाक्रान्तचरणां देवीं सुखं प्रष्टुमागता ।

राजा—ततस्ततः

विदू०—तदो सा देवीए पुच्छिदा । किंणु ओलोइदो वल्लहजणो
ततः सा देव्या पृष्टा । किं न्ववलोकितो वल्लभजन
त्ति । ताए उत्तं । मन्दो वो उवआरो जं परिजणे संकन्तं वल्लहत्तणं
इति । तयोक्तम् । मन्दो व उपचारो यत्परिजने सङ्क्रान्तं वल्लभत्वं
ण जाणीअदि ।
न ज्ञायते ।

राजा—निर्भेदादृतेऽपि मालविकायामयमुपन्यासः शङ्कयति ।

विदू०—तदो ताए अणुबन्धिज्जमाणाए भवदो अविणअं अन्तरेण
ततस्तयानुबध्यमानया भवतोऽविनयमन्तरेण

बिडालगृहीतायाः मार्जारालम्बितायाः । पिङ्गलाक्ष्या मोहितनेत्रया, कोपात्पिङ्गलत्वम् । सारभाण्डमिव प्रधानमूलधनमिव ।

ह्यः किल पूर्वेद्युः किल । निर्भेदादृतेपि प्रतर्ककारणं विनापि । अन्तरेण उद्दिश्य ।

परिगहीदत्था किदा देवी।
परिगृहीतार्था कृता देवी।

राजा—अहो दीर्घरोषता तत्रभवत्याः। अतः परं कथय।

विदू०—किं अदो वरं। मालविआ बउलावलिआ अणिअल-
क्रिमतः परम्। मालविका बकुलावलिका च निगल-
वदीओ अदिट्ठसुज्जपादं पादालवासं णाअकण्णआओ विअ
वत्यावदृष्टसूर्यपादं पातालवासं नागकन्यके इवा-
अणुहोन्ति।
नुभवतः।

राजा—कष्टं कष्टम्।

मधुरस्वरा परभृता भ्रमरी च विबुद्धचूतसङ्गिन्यौ।
कोटरमकालवृष्ट्या प्रबलपुरोवातया गमिते॥ २॥

अप्यत्र कस्यचिदुपक्रमस्य गतिः स्यात्।

विदू०—कहं भविस्सदि। जं सारभाण्डघरए वाउदा माहविआ
कथं भविष्यति। यत्सारभाण्डगृहे व्यापृता माधविका
देवीए संदिट्ठा। मह अङ्गुलीअअमुद्दं अदेक्खिअ ण मोत्तव्वा तुए हदासा
देव्या संदिष्टा। ममाङ्गुलीयकमुद्रामदृष्ट्वा न मोक्तव्या त्वया हताशा
मालविआ बउलावलिआ अ त्ति।
मालविका बकुलावलिका चेति।

राजा—(निःश्वस्य सपरामर्शम्) सखे किमत्र कर्तव्यम्।

विदू०—(विचिन्त्य) अत्थि एत्थ उवाओ।
अस्त्यत्रोपायः।

राजा—क इव।

मधुरेति। मधुरस्वरा। परभृता कोकिलवधूः। भ्रमरी च षट्पदा च। विबुद्धचूतसङ्गिन्यौ प्रफुल्लसहकारकुसुमसङ्गते। प्रबलपुरोवातया प्रबलाभिमुख-प्रतिकूलानिलया। अकालवृष्ट्या अकालासारेण। कोटरं निष्कुहम्। गमिते प्रापिते॥२॥

उपक्रमः प्रतीकारः। गतिः अवकाशः।

सारभाण्डव्यापृता सारभाण्डाधिकारिणी।

विदू०—तहिं असोअत्थवअकारणादो पसारिदे दक्खिणहत्थे
तस्मिन्नशोकस्तबककारणात्प्रसारिते दक्षिणहस्ते
कोडरणिग्गदेण सप्पख्वेण कालेण दट्ठोह्मि । णं एदाइं दुवे दंसपदाइं ।
कोटरनिर्गतेन सर्परूपेण कालेन दष्टोऽस्मि । नन्वेते द्वे दंशपदे ।

(इति दंशं दर्शयति)

परि०—तेन हि दंशच्छेदः पूर्वकर्मेति श्रूयते । स तावदस्य क्रियताम् ।

छेदो दंशस्य दाहो वा क्षतेर्वा रक्तमोक्षणम् ।
एतानि दष्टमात्राणामायुष्याः प्रतिपत्तयः ॥४॥

राजा—सम्प्रति विषवैद्यानां कर्म । जयसेने क्षिप्रमानीयतां ध्रुवसिद्धिः ।

प्रती०—जं देवो आणवेदि । (इति निष्क्रान्ता)
यद्देव आज्ञापयति ।

विदू०—अहो पावेण मिच्चुणा गहीदोह्मि ।
अहो पापेन मृत्युना गृहीतोऽस्मि ।

राजा—मा कातरो भूः । अविषोऽपि कदाचिद्दंशो भवेत् ।

विदू०—कहं ण भाइस्सं । सिमसिमाअन्ति मे अङ्गाइं । इति विषवेगं रूपयति
कथं न भेष्यामि । सिमसिमायन्ति मेऽङ्गानि ।

देवी—हा दंसिदं असुहं विआरेण । अवलम्बध बम्हणं ।
हा दर्शितमशुभं विकारेण । अवलम्बध्वं ब्राह्मणम् ।

(परिव्राजिका ससंभ्रममवलम्बते)

विदू०—(राजानं विलोक्य) भो भवदो बाल्लत्तणादो पिअवयस्सोह्मि ।
भो भवतो बाल्यात् प्रियवयस्योस्मि ।

दंशच्छेदः दष्टमात्रच्छेदः ।

छेद इति । छेदः उक्तः । दाहः । क्षतेः सर्पक्षतेः । रक्तमोचनं दुष्टरक्तहरणम् । एतानि छेददाहरक्तमोक्षणानि । दष्टमात्राणां दष्टक्षणमात्र एव । आयुष्याः आयुष्कराः । प्रतिपत्तयः प्रतिक्रियाः । प्रतिपत्तिस्तु कर्त्तव्ये तद्बुद्धौ गौरवेऽपि च ॥४॥

तं विआरिअ अवुत्ताए मे जणणीए जोगक्खेमं वहेहि ।
तद् विचार्यापुत्राया मे जनन्या योगक्षेमं वह ।

राजा—मा भैषीः । स्थिरो भव । अचिरात्त्वां वैद्यश्चिकित्सते ।

(प्रविश्य)

जयसेना—देव आणाविदो धुवसिद्धी विण्णावेदि । इह एव्व
देव आज्ञापितो ध्रुवसिद्धिर्विज्ञापयति । इहैवा-
आणीअदु गोदमोत्ति ।
नीयतां गौतम इति ।

राजा—तेन हि वर्षवरपरिगृहीतमेनं तत्रभवतः सकाशं प्रापय ।

जयसेना—तह ।
तथा ।

विदू०—(देवीं विलोक्य) भोदि जीवेअं वा ण वा, जं मए अत्त
भवति जीवेयं वा न वा, यन्मयात्र-
भवन्तं सेवन्तेण ते अवरद्धं तं मरिसेहि ।
भवन्तं सेवमानेन तेऽपराद्धं तन्मर्षय ।

देवी—दीहाऊ होहि । (निष्क्रान्तो विदूषकः प्रतिहारी च)
दीर्घायुर्भव ।

राजा—प्रकृतिभीरुस्तपस्वी । ध्रुवसिद्धेरपि यथार्थनाम्नः सिद्धिं न मन्यते ।

(प्रविश्य)

जय०—जेदु भट्टा । धुवसिद्धी विण्णावेदि । उदकुम्भविहाणे
जयतु भर्ता । ध्रुवसिद्धिर्विज्ञापयति । उदकुम्भविधाने
सप्पमुद्दिअं किंपि कप्पइदव्वं । तं अण्णेसीअदुत्ति ।
सर्पमुद्रितं किमपि कल्पयितव्यम् । तदन्विष्यतामिति ।

देवी—इदं सप्पमुद्दिअं अङ्गुलीअअं । पच्छा मम हत्थे देहि णं ।
इदं सर्पमुद्रितमङ्गुलीयकम् । पश्चान्मम हस्ते देह्येतत् ।

(इत्यङ्गुलीयकं ददाति)

(प्रतिहारी गृहीत्वा प्रस्थिता)

वर्षवरः षण्डः । उदकुम्भविधाने जलपूर्णकुम्भच्छादने ।

राजा—जयसेने कर्मसिद्धावाशु प्रतिपत्तिमानय।

प्रती०—जं देवो आणवेदि।

यद्देव आज्ञापयति।

परि०—यथा मे हृदयमाचष्टे तथा निर्विषो गौतमः।

राजा—भूयादेवम्।

(प्रविश्य)

जय०—जेदु देवो। णिवुत्तविसवेगो गोदमो मुहुत्तेण पकिदित्थो

जयतु देवः। निवृत्तविषवेगो गौतमो मुहूर्तेन प्रकृतिस्थः

संवुत्तो।

संवृत्तः।

देवी—दिट्ठिआ वअणीआदो मुत्तह्मि।

दिष्टया वचनीयान्मुक्तास्मि।

प्रती०—एसो उण अमच्चो वाहृतओ विण्णावेदि। राअकज्जं बहु

एष पुनरमात्यो वाहृतको विज्ञापयति। राजकार्यं बहु

मन्तिदव्वं। ता दंसणेण अणुग्गहं इच्छामि त्ति।

मन्त्रयितव्यम्। तद्दर्शनेनानुग्रहमिच्छामीति।

देवी—गच्छदु अज्जउत्तो कज्जसिद्धीए।

गच्छत्वार्यपुत्रः कार्यसिद्धये।

राजा—आतपाक्रान्तोऽयमुद्देशः। शीतक्रिया चास्या रुजः प्रशस्ता तदन्यत्र नीयतां शयनीयम्।

देवी—बालिआओ अज्जउत्तवअणं अणुचिट्ठह।

बालिकाः आर्यपुत्रवचनमनुतिष्ठत।

परिजनः—तह।

तथा।

(निष्क्रान्ता देवी परिव्राजिका परिजनश्च)

राजा—जयसेने गूढेन पथा मां प्रमदवनं प्रापय।

प्रतीहारी०—इदो इदो देवो।

इत इतो देवः।

राजा—जयसेने समाप्तकृत्यो ननु गौतमः।

प्रती०—अह इं।

अथ किम्।

राजा—

इष्टाधिगमनिमित्तं प्रयोगमेकान्तसाध्यमपि मत्वा।
संदिग्धमेव सिद्धौ कातरमाशङ्कते चेतः ॥ ५ ॥

(प्रविश्य)

विदूषकः—वड्ढदु भवं। सिद्धाइं दे मङ्गलकम्माइं।

वर्धतां भवान्। सिद्धानि ते मङ्गलकर्माणि।

राजा—जयसेने त्वमपि स्वनियोगमशून्यं कुरु।

प्रती०—जं देवो आणवेदि। (इति निष्क्रान्ता)

यद्देव आज्ञापयति।

राजा—वयस्य क्षुद्रा माधविका। न खलु किंचिद्विचारितमनया।

विदू०—देवीए अङ्गुलीअअमुद्दिअं देक्खिअ कहं विआरेदि।

देव्या अङ्गुलीयकमुद्रां दृष्ट्वा कथं विचारयति।

राजा—न खलु मुद्रामधिकृत्य ब्रवीमि। एतयोर्बद्धयोः किंनिमित्तोयं मोक्षः। किं देव्याः परिजनमतिक्रम्य भवान्संदिष्ट इत्येवमनया प्रष्टव्यम्।

विदूषकः—णं पुच्छिदोह्मि। पुणो मन्दस्स वि मे तस्सिं पच्चुप्पण्णा मदी।

ननु पृष्टोऽस्मि। पुनर्मन्दस्यापि मे तस्मिन्प्रत्युत्पन्ना मतिः।

राजा—कथ्यताम्।

विदू०—भणिदा मए। देव्वचिन्तएहिं विण्णाविदो राआ।

भणिता मया। दैवचिन्तकैर्विज्ञापितो राजा।

इष्टाधिगमेति। इष्टाधिगमनिमित्तं वाञ्छितवस्तुप्राप्तिकारणम्। प्रयोगं कार्यविचारादिप्रयोगं कर्म अथवा औषधादिप्रयोगम्। एकान्तसाधुं स्वभाव ह्यम्। मत्वापि बुद्ध्वापि। सिद्धौ कार्यसिद्धौ। कातरम्। चेतः मनः। संदिग्धमेव ससन्देहमेव। आशङ्कते ॥५॥

क्षुद्रा वञ्चिका। दैवचिन्तकैः ज्योतिषज्ञैः।

सोवसग्गं वो णक्खत्तं । सव्वबन्धणमोक्खो करीअदु त्ति ।
सोपसर्गं वो नक्षत्रम् । सर्वबन्धनमोक्षः क्रियतामिति ।

राजा—(सहर्षम्) ततस्ततः ।

विदू०—तं सुणिअ देवीए इरावदीचित्त रक्खन्तीए राआ किल
तच्छ्रुत्वा देव्येरावतीचित्तं रक्षन्त्या राजा किल
मोएदित्ति अहं संदिट्ठो त्ति । तदो जुज्जदि त्ति ताए संपादिदो अत्थो ।
मोचयतीत्यहं संदिष्ट इति । ततो युज्यत इति तया संपादितोऽर्थः ।

राजा—(विदूषकं परिष्वज्य) सखे प्रियोऽहं तव ।

नहि बुद्धिगुणेनैव सुहृदामर्थदर्शनम् ।
कार्यसिद्धिपथः सूक्ष्मः स्नेहेनाप्युपलभ्यते ॥६॥

विदू०—तुवरदु भवं । समुद्दघरए सहीसहिदं मालविअं ठाविअ
त्वरतां भवान् । समुद्रगृहे सखीसहितां मालविकां स्थापयित्वा
भवन्तं पच्चुग्गदोह्मि ।
भवन्तं प्रत्युद्गतोस्मि ।

राजा—अहमेनां संभावयामि । गच्छाग्रतः ।

विदू०—एदु भवं (परिक्रम्य) इदं समुद्दघरं ।
एतु भवान् इदं समुद्रगृहम् ।

राजा—(साशङ्कम्) वयस्य एषा कुसुमावचयव्यग्रहस्ता सख्यास्ते इरावत्याः परिचारिका चन्द्रिका संनिकृष्टमागच्छति । इतस्तावदावां भित्तिगूढौ भवावः ।

विदू०—अहो कुम्भीलएहिं कामुएहिं च परिहरणीआ खु चन्दिआ ।
अहो कुम्भीलकैः कामुकैश्च परिहरणीया खलु चन्द्रिका ।

(उभे यथोक्तं कुरुतः)

सोपसर्गं सोपद्रवम् ।

नहीति । सुहृदाम् इष्टानाम् । अर्थदर्शनम् । बुद्धिगुणेन बुद्धिविचारेण । सूक्ष्मः गूढः अल्पो वा । कार्यसिद्धिपथः कार्यसिद्धिमार्गोऽपि । स्नेहेन प्रेम्णा उपलभ्यते ॥६॥

समुद्रगृहे मुद्रायुक्ते गृहे सलाञ्छने गृहे, मुद्रितगृहद्वार इत्यर्थः । कुम्भीलकैः तस्करैः । कामुकैः कामिभिः । चन्द्रिका ज्योत्स्ना ।

राजा—गौतम कथं नु ते सखी मां प्रतिपालयति। एहि एनां गवाक्षमाश्रित्य विलोकयावः।

विदू०—तह।
तथा।

(उभौ विलोकयन्तौ तिष्ठतः)

(ततः प्रविशति मालविका बकुलावलिका च)

बकुलावलिका—सहि पणम भट्टारं।
सखि प्रणम भर्त्तारम्।

राजा—मन्ये मे प्रतिकृतिं निर्दिशति।

माल०—(सहर्षम्) णमो दे। (द्वारमवलोक्य सविषादम्) हला मं
नमस्ते। सखि मां

विप्पलम्भेसि।
विप्रलम्भयसि।

राजा—हर्षविषादाभ्यामत्रभवत्याः प्रीतोऽस्मि।

सूर्योदये भवति या सूर्यास्तमये च पुण्डरीकस्य।
वदनेन सुवदनायास्ते समवस्थे क्षणादूढे ॥७॥

बकु—णं एसो चित्तगदो भट्टा।
नन्वेष चित्रगतो भर्ता।

उभे—(प्रणिपत्य) जेदु भट्टा।
जयतु भर्ता।

माल०—हला तदा समुहट्टिदा भट्टिणो रूवदंसणेण ण तहा
सखि तदा संमुखस्थिता भर्तू रूपदर्शनेन न तथा

वितिण्हह्मि जह अज्ज मए विभाविदो चित्तगददंसणो भट्टा।
वितृष्णास्मि यथाद्य मया विभावितश्चित्रगतदर्शनो भर्ता।

सूर्येति। पुण्डरीकस्य सरोजस्य। सूर्योदये। या समवस्था शोभा। सूर्यास्तमये आदित्यास्तमये च। या समवस्था विशोभा दशा भवति। सुवदनाया मालविकायाः। वदनेन मुखेन। ते समवस्थे सशोभाविशोभादशे। क्षणात् सद्य एव। ऊढे प्राप्ते। 'वह प्रापणे'। वदनं हर्षशोकावहमिति भावः।

विदू०—सुदं भवदा । अत्तहोदी चित्ते जह दिट्ठो तह ण दिट्ठो
श्रुतं भवता । अत्रभवती चित्रे यथादृष्टस्तथा न दृष्टो
भवं ति मन्तेदि । मुहा दाणिं मज्जूसा विअ रअणभण्डअं जोव्वणगव्वं
भवानिति मन्त्रयते । मुधेदानीं मञ्जूषेव रत्नभाण्डं यौवनगर्वं
वहेसि ।
वहसि ।

राजा—सखे कुतूहलवानपि निसर्गशालीनः स्त्रीजनः । पश्य ।

कात्स्न्येंन निर्वर्णयितुं च रूप-
मिच्छन्ति तत्पूर्वसमागमानाम् ।
न च प्रियेष्वायतलोचनानां
समग्रपातीनि विलोचनानि ॥८॥

माल०—हला का एसा पासपरिउत्तवअणेण भट्टिणा सिणिद्धाए
सखि कैषा पार्श्वपरिवृत्तवदनेन भर्त्रा स्निग्धया
दिट्ठिए णिज्झाईअदि ।
दृष्ट्या निध्यायते ।

बकु०—णं इअं पासगदा इरावदी ।
नन्वियं पार्श्वगतेरावती ।

माल०—सहि अदक्खिणो विअ भट्टा मे पडिभादि । जो सव्वं
सखि अदक्षिण इव भर्ता मे प्रतिभाति । यः सर्वं
देवीजणं उज्झिअ एकाए मुहे बद्धलक्खो ।
देवीजनमुज्झित्वैकस्या मुखे बद्धलक्ष्यः ।

बकु०—(आत्मगतम्) चित्तगदं भट्टारं परमत्थदो गेण्हिअ
चित्रगतं भर्तारं परमार्थतः गृहीत्वा

कार्त्स्न्येनेति । आयतलोचनानाम् आयतदृशाम् । प्रियाणाम् । रूपम् । कार्त्स्न्येन साकल्येन । निर्वर्णयितुम् आलोकयितुम् । इच्छन्ति । तथापि । प्रियैः सह तत्पूर्वसमागमानां तत्प्रथमसमागमानाम् । आयतलोचनानां स्त्रीणाम् । विलोचनानि । । प्रियेषु नायकेषु समग्रपातीनि न भवन्ति ॥८॥

निध्यायते अवलोक्यते । बद्धलक्ष्यः एकाग्रचित्तः ।

असूअदि । होदु । क्रीडिस्सं दाव एदाए । (प्रकाशम्) हला भट्टिणो
असूयति । भवतु । क्रीडिष्यामि तावदेतया । सखि भर्तु-
वल्लहा एसा ।
वल्लभैषा ।

माल०—तदो किं दाणिं अत्ताणं आआसेमि ।
ततः किमिदानीमात्मानमायासयिष्यामि ।

(इति सासूयं परावर्तते)

राजा—सखे पश्य ।

भ्रूभङ्गभिन्नतिलकं स्फुरिताधरोष्ठं
सासूयमाननमितः परिवर्तयन्त्या ।
कान्तापराधकुपितेष्वनया विनेतुः
संदर्शितेव ललिताभिनयस्य शिक्षा ॥९॥

विदू०—अणुणअसज्जो दाणिं होहि ।
अनुनयसज्ज इदानीं भव ।

माल०—अज्जगोदमो वि एत्थ एव्व एव सेवदि णं ।
आर्यगौतमोप्यत्रैव सेवते एनम् ।

(पुनः स्थानान्तराभिमुखी भवितुमिच्छति)

बकु०—(मालविकां रुद्ध्वा) ण खु कुविदा दाणिं तुमं ।
न खलु कुपितेदानीं त्वम् ।

माल०—जइ चिरं कुविदं एव्व मं मण्णसि एसो पच्चाणीअदि
यदि चिरं कुपितामेव मां मन्यसे एष प्रत्यानीयते
कोवो ।
कोपः ।

भ्रूभङ्गेति । सासूयं सामर्षम् । इतः अस्मात् प्रदेशात् । तया । भ्रूभङ्गभिन्नतिलकं कुटिलभ्रविकारनिवृत्तविशेषकम् । स्फुरिताधरोष्ठम् । आननं मुखम् । परिवर्तयन्त्या निवर्तयन्त्या । अनया । कान्तापराधकुपितेषु । ललिता-भिनयस्य । शिक्षा अध्यापनम् । विनेतुः उपाध्यायस्य नृत्ताचार्यस्य । सन्दर्शितेव ॥९॥

राजा—(उपेत्य)

कुप्यसि कुवलयनयने चित्रार्पितचेष्टया किमतन्मे ।
ननु तत्र साक्षादयमहमनन्यसाधारणो दासः ॥१०॥

वकु०—जेदु भट्टा ।
जयतु भर्ता ।

माल०—(आत्मगतम्) कहं चित्तगदो भट्टा मए असूइदो ।
कथं चित्रगतो भर्ता मयासूयितः ।

(इति सव्रीडवदनाञ्जलिं करोति)

(राजा मदनकातर्यं रूपयति)

विदू०—किं भवं उदासीनो विअ ।
किं भवानुदासीन इव ।

राजा—अविश्वसनीयत्वात्सख्यास्तव ।

विदू०—अत्तहोदीए अअं तुह अविस्सासो ।
अत्रभवत्यामयं तवाविश्वासः ।

राजा—श्रूयताम् ।

पथि नयनयोः स्थित्वा स्वप्ने तिरोभवति क्षणा-
त्सरति सहसा बाह्वोर्मध्यं गतापि सखी तव ।
मनसिजरुजा क्लिष्टस्यैवं समागममायया
कथमिव सखे विश्रब्धं स्यादिमां प्रति मे मनः ॥११॥

कुप्यसीति । हे कुवलयनयने । चित्रार्पितचेष्टया चित्रलिखितस्वरूप व्यापारतयापि । एवं प्रकारेण । किं कुप्यसि । अनन्यसाधारणः अन्यासां सामान्यो न । तव । दासोऽयमहं साक्षान्नु ॥१३॥

पथीति । सा अबला । नयनयोः पथि नयनमार्गे दृष्टिगोचरे वा स्थित्वा । क्षणात् । तिरोभवति प्रच्छन्ना भवति । बाह्वोर्मध्यम् आलिङ्गनार्थं बाहुयुगलम् । गतापि । अबला सती अक्षमा सती । सरति अन्यत्र गच्छति । स्वगतौ । हे सखे । मनसिजरुजा क्लिष्टस्य कामव्याधिना व्यथितस्य । मे । मनः । एवं समागममायया । इमां मालविकां प्रति । कथमिव केन विश्वासेन । विश्रब्धं स्यात् विश्वस्तं स्यात् ॥११॥

बकु०—सहि बहुसो किल भट्टा विप्पलद्धो। दाणिं दाव अत्ता
सखि बहुशः किल भर्ता विप्रलब्धः। इदानीं तावदात्मा
विस्ससणिज्जो करीअदु।
विश्वसनीयः क्रियताम्।

माल०—सहि मइ उण मन्दभग्गाए सिविणसमाअमो वि भट्टिणो
सखि मम पुनर्मन्दभाग्यायाः स्वप्नसमागमोपि भर्तु-
दुल्लहो आसि।
र्दुर्लभ आसीत्।

बकु०—भट्टा कहेदु से उत्तरं।
भर्ता कथयत्वस्या उत्तरम्।

राजा—

उत्तरेण किमात्मैव पञ्चबाणाग्निसाक्षिकम्।
तव सख्यै मया दत्तो न सेव्यो सेविता रहः॥१२॥

बकु०—अणुगहीदम्ह।
अनुगृहीते स्वः।

विदू०—(परिक्रम्य ससंभ्रमम्) बकुलावलिए एसो बालासोअ-
बकुलावलिके एष बालाशोक-
रुक्खस्स पल्लवाइं लङ्घेदि हरिणो। एहि णिवारेम णं।
वृक्षस्य पल्लवानि लङ्घयति हरिणः। एहि निवारयाव एनम्।

बकु०—तह। (इति प्रस्थिता)
तथा।

राजा—वयस्य एवमेवास्मिन्रक्षणक्षणेऽवहितेन त्वया भवितव्यम्।

विदू०—एव्वं वि गोदमो संदिसेअदि।
एवमपि गौतमः संदिश्यते।

उत्तरेणेति। उत्तरेण प्रत्युत्तरेण। किं किं प्रयोजनम्। पञ्चबाणाग्नि-साक्षिकं कामाग्निसाक्षिकम्। तव सख्यै। मयैव। आत्मा दत्तः। रहः सेविता एकान्ते शुश्रूषकः। त्वया। न सेव्यः। चित्रे एका सेविता एकान्त-सेविता अहं त्वया प्रत्यक्षं न सेव्यः॥१२॥

बकु०—(परिक्रम्य) अज्ज गोदम अहं अप्पआसे चिट्ठामि । तुमं
आर्य गौतम अहमप्रकाशे तिष्ठामि । त्वं
दुवाररक्खओ होहि ।
द्वाररक्षको भव ।

विदू०—जुज्जइ ।
युज्यते ।

(निष्क्रान्ता बकुलावलिका)

विदू०—इमं दाव फलिहत्थलं अस्सिदो होमि । (तथा कृत्वा)
इदं तावत्स्फटिकस्थलमाश्रितो भवामि ।
अहो सुहप्फरिसदा सिलाविसेसस्स । (इति निद्रायते)
अहो सुखस्पर्शता शिलाविशेषस्य ।

(मालविका ससाध्वसं तिष्ठति)

राजा—

विसृज सुन्दरि संगमसाध्वसं तव चिरात्प्रभृति प्रणयोन्मुखे ।
परिगृहाण गते सहकारतां त्वमतिमुक्तलताचरितं मयि॥१३॥

माल०—देवीए भएण अत्तणो पिअं कादुं ण पारेमि ।
देव्या भयेनात्मनः प्रियं कर्तुं न पारयामि ।

राजा—अयि न भेतव्यम् ।

माल०—(सोपालम्भम्) जो ण भाअदि सो मए भट्टिणीदंसणे
यो न बिभेति स मया भट्टिनीदर्शने
दिट्ठिसमत्थो भट्टा ।
दृष्टसामर्थ्यो भर्ता ।

विसृजेति । हे सुन्दरि शोभने । संगमसाध्वसं संपर्कव्यलीकम् । विसृज त्यज । चिरात्प्रभृति अनेककालमारभ्य । प्रणयोन्मुखे सङ्गमस्नेहोन्मुखे सङ्गमाभिलाषोन्मुखे वा । मयि । साध्वसं भयम् । मयि सहकारतां गते सति । अतिमुक्तलताचरितं वासन्तिकाकृत्यम् । 'अतिमुक्तः पुण्ड्रकः स्यात् वासन्ती माधवी लता' इति कोशः अतिमुक्तलता सहकारसङ्गमे गतसाध्वसा सशोभा च भवति । प्रतिगृहाण पुनः प्रतिपद्यस्व ॥१३॥

भट्टिनी कृताभिषेका महिषी ।

राजा—

दाक्षिण्यं नाम बिम्बोष्ठि बैम्बिकानां कुलव्रतम् ।
तन्मे दीर्घाक्षि ये प्राणास्ते त्वदाशानिबन्धनाः ॥१४॥

तदनुगृह्यतां चिरानुरक्तोऽयं जनः । (इति संश्लेषमभिनयति)

(मालविका नाट्येन परिहरति)

राजा—(आत्मगतम्) रमणीयः खलु नवाङ्गनानां मदनविषय-व्यापारः । तथा हि ।

हस्तं कम्पवती रुणद्धि रशनाव्यापारलोलाङ्गुलिं
हस्तौ स्वौ नयति स्तनावरणतामालिङ्ग्यमाना बलात् ।
पातुं पक्ष्मलचक्षुरुन्नमयतः साचीकरोत्याननं
व्याजेनाप्यभिलाषपूरणसुखं निर्वर्तयत्येव मे ॥१५॥

(ततः प्रविशतीरावती निपुणिका च)

इरावती—हञ्जे णिउणिए सच्चं तुमं परिगदत्था चन्दिआए
हञ्जे निपुणिके सत्यं त्वं परिगतार्था चन्द्रिकया
समुद्दघरअलिन्दे सइदो एआई अज्जगोदमो दिट्ठोत्ति ।
समुद्रगृहालिन्दे शयित एकाकी आर्यगौतमो दृष्ट इति ।

दाक्षिण्यमिति । हे बिम्बोष्ठि बिम्बफलाधरोष्ठे । बैम्बिकानाम् अग्नि-मित्रवंशजानां सरलमुखप्रसादशीलानामित्यर्थः । बिम्बशब्दोऽत्र मुखे वर्तते । 'बिम्बोऽस्त्री मण्डले सम्पत् प्रतिभामुखलक्ष्मसु' इति यादवः । दाक्षिण्यं सार-ल्यम् । कुलव्रतं नाम कुलक्रमागतमेव यत्, तत् । हे दीर्घाक्षि विशाललोचने । ये मे प्राणाः ते त्वदाशानिबन्धनाः त्वदधीनाः ॥१४॥

नवाङ्गनानां नववधूनाम् । मदनविषयव्यापारः कामोपभोगे आलिङ्गनाद्यनुभवः ।

हस्तमिति ! प्रथमं तावत् । कम्पवती । रशनाव्यापारलोलाङ्गुलिं हस्तं नीवीविश्लेषणार्थं रशनास्थाने संचारितं करम् । रुणद्धि । 'रुधिर् आवरणे' ·श्चात् बलादालिङ्ग्यमाना सती । स्वौ हस्तौ आत्मीयकरौ । स्तनावरणतां छादनताम् । नयति । पक्ष्मलनेत्रं सविलासनेत्रं सान्द्ररोमयुक्तनेत्रं वा । आननं मुखम् । पातुम् अधरास्वादनं कर्तुम् । उन्नमयतः ऊर्ध्वमभिमुखं नयतः । मम साचीकरोति । उन्नमयत इत्यनादरे षष्ठी । एवं व्याजेन वर्तमानापि । अभिलाष-पूरणसुखं सुखाभिलाषपूरणं निर्वर्तयत्येव ॥१५॥

निपुणिका—अण्णहा कहं भट्टिणीए विण्णावेमि ।
अन्यथा कथं भट्टिन्यै विज्ञापयामि ।

इरा०—तेण हि तहिं एव्व गच्छामो संसआदो मुत्तं अज्जउत्तस्स
तेन हि तत्रैव गच्छामः संशयान्मुक्तमार्यपुत्रस्य
पिअवअस्सं पुच्छिदुं अ ।
प्रियवयस्यं प्रष्टुं च ।

निपु०—सावसेसं विअ भट्टिणीए वअणं ।
सावशेषमिव भट्टिन्या वचनम् ।

इरा०—चित्तगदं अज्जउत्तं पसादेदुं अ ।
चित्रगतमार्यपुत्रं प्रसादयितुं च ।

निपु०—अह कहं दाणिं भट्टा एव्व ण प्पसादीअदि ।
अथ कथमिदानीं भर्ता एव न प्रसाद्यते ।

इरा०—मुद्धे जारिसो चित्तगदो तारिसो एव्व अण्णसंकन्त-
मुग्धे यादृशश्चित्रगतस्तादृश एवान्यसंक्रान्त
हिअओ अज्जउत्तो । केवलं उअआरादिक्कमं पमज्जिदुं अअं
हृदय आर्यपुत्रः । केवलमुपचारातिक्रमं प्रमार्जितुमय-
आरम्भो ।
मारम्भः ।

निपु०—इदो इदो भट्टिणी । (उभे परिक्रामतः)
इत इतो भट्टिनी ।

(प्रविश्य)

चेटी—जेदु भट्टिणी । देवी भणादि । ण मे एसो मच्छरस्स
जयतु भट्टिनी । देवी भणति । न म एष मत्सरस्य
कालो । तेण खु तुह बहुमाणं वड्ढेदुं वअस्सिआए सह णिअल-
कालः । तेन खलु तव बहुमानं वर्धयितुं वयस्यया सह निगल-
बन्धणे किदा मालविआ । जइ अणुमण्णसि अज्जउत्तस्स पिअं
बन्धने कृता मालविका । यद्यनुमन्यस आर्यपुत्रस्य प्रियं
कादुं तहा करेमि । जं तुह इच्छिअं तं मे भणाहित्ति ।
कर्तुं तथा करोमि । यत्तवेष्टं तन्मे भणेति ।

इरा०—णाअरिए विण्णावेहि देविं। का वअं भट्टिणि णिओजेदुं।
नागरिके विज्ञापय देवीम्। का वयं भट्टिनीं नियोजयितुम्।
परिअणणिअलणेण दंसिदो मइ अणुग्गहो। कस्स वा अण्णस्स
परिजननिगलनेन दर्शितो मय्यनुग्रहः। कस्य वान्यस्य
पसादेण अअं जणो वड्ढदित्ति।
प्रसादेनायं जनो वर्धत इति।

चेटी—तह। (इति निष्क्रान्ता)
तथा।

निपु०—(परिक्रम्यावलोक्य च) भट्टिणि एसो दुवारदेसे समुद्दघरस्स
भट्टिनि एष द्वारदेशे समुद्रगृहस्य
विपणिगदो विअ बलीवद्दो अज्जगोदमो आसीणो एव्व णिद्दाअदि।
विपणिगत इव बलीवर्द आर्यगौतम आसीन एव निद्रायते।

इरा०—अच्चाहिदम्। ण खु सावसेसो विसविआरो हवे।
अत्याहितम्। न खलु सावशेषो विषविकारो भवेत्।

निपु०—पसण्णमुहवण्णो दीसइ। अवि अ धुवसिद्धिणा
प्रसन्नमुखवर्णो दृश्यते। अपि च ध्रुवसिद्धिना
चिइच्छिदो। ता से असङ्कणिज्जं पावं।
चिकित्सितः। तदस्याशङ्कनीयं पापम्।

बिदू०—(उत्स्वप्नायते) भोदि मालविए।
भवति मालविके।

निपु०—सुदं भट्टिणीए। कस्स एसो अत्तणीणो हदासो किदवो।
श्रुतं भट्टिन्या। कस्यैष आत्मनीनो हताशः कितवः।
सव्वकालं इदो एव्व सोत्थिवाअणमोदएहिं कुच्छि पूरिअ संपदं
सर्वकालमित एव स्वस्तिवाचनमोदकैः कुक्षिं पूरयित्वा सांप्रतं
मालविअं उस्सिविण्णावेदि।
मालविकामुत्स्वप्नायते।

अत्याहितं नाम जीवानपेक्षि कर्म। 'अत्याहितं महाभीतिः कर्म जीवानपेक्षि च' इत्यमरः। उत्स्वप्नः निद्रावशवाक्यम्।

विदू०—इरावदिं अदिक्कमन्ती होहि ।
इरावतीमतिक्रामन्ती भव ।

निपु०—एदं अच्चाहिदं । इमं भुअङ्गभीरुअं बह्मबन्धुं इमिणा
एतदत्याहितम् । इमं भुजङ्गभीरुकं ब्रह्मबन्धुमनेन
भुअङ्गकुडिलेण दण्डकट्ठेण खम्भन्तरिदा भाअइस्सं ।
भुजङ्गकुटिलेन दण्डकाष्ठेन स्तम्भान्तरिता भीषयिष्यामि ।

इरा०—अरुहदि एव्व किदग्घो उवद्दवस्स ।
अर्हत्येव कृतघ्न उपद्रवस्य ।

(निपुणिका विदूषकस्योपरि दण्डकाष्ठं पातयति)

विदू०—(सहसा प्रबुध्य) अविहा अविहा । भो वअस्स
अविधा अविधा । भो वयस्य
सप्पो मे उवरि पडिदो ।
सर्पो म उपरि पतितः ।

राजा—(सहसोपसृत्य) सखे न भेतव्यं न भेतव्यम् ।

माल०—(अनुसृत्य) भट्टा मा दाव सहसा णिक्कम ।
भर्तः मा तावत्सहसा निष्काम ।
सप्पोत्ति भणीअदि ।
सर्प इति भण्यते ।

इरा०—हद्धि हद्धि । भट्टा इदो एव्व धावदि ।
हा धिक् हा धिक् । भर्ता इत एव धावति ।

विदू०—(सप्रहासम्) कहं दण्डकट्ठं एदं । अहं उण जाणे
कथं दण्डकाष्ठमेतत् । अहं पुनर्जाने
जं मए केदईकण्टएहिं दंसं करिअ सप्पस्स इव दंसो किदो तं मे
यन्मया केतकीकण्टकैर्दंशं कृत्वा सर्पस्य इव दंशः कृतस्तन्मे
फलिदंति ।
फलितम् ।

निष्काम उपसर्प ।

(प्रविश्य पटाक्षेपेण)

बकुलावलिका—मा दाव भट्टा पविसदु । इह कुडिलगई सप्पो
मा तावद्भर्ता प्रविशतु । इह कुटिलगतिः सर्प
विअ दीसदि ।
इव दृश्यते ।

इरा०—(स्तम्भान्तरिता राजानमुपेत्य) अवि णिव्विग्घमणोरहो
अपि निर्विघ्नमनोरथो
दिवासंकेदो मिहुणस्स ।
दिवासंकेतो मिथुनस्य ।

(सर्वे इरावतीं दृष्ट्वा सम्भ्रान्ताः)

राजा—प्रिये अपूर्वोऽयमुपचारः ।

इरा०—बउलावलिए दिट्ठिआ दुच्चाहिआरविसआ संपुण्णा दे वइण्णा ।
बकुलावलिके दिष्टया दूत्याधिकारविषया सम्पूर्णा ते प्रतिज्ञा ।

बकु०—पसीददु भट्टिणी । किं णु खु दद्दुरा वाहरन्तित्ति
प्रसीदतु भट्टिनी । किं नु खलु दर्दुरा व्याहरन्तीति
देवो पुढवीं विसुमरदि ।
देवः पृथिवीं विस्मरति ।

विदू०—मा दाव । होदीए दंसणमत्तेण अत्तभवं पणिवादलङ्घणं
मा तावत् । भवत्या दर्शनमात्रेणात्रभवान् प्रणिपातलङ्घनं
विसुमरिदो । होदी उण अज्जवि पसादं ण गेण्हेदि ।
विस्मृतः । भवती पुनरद्यापि प्रसादं न गृह्णाति ।

इरा०—कुविदा दाणिं अहं किं करिस्सं ।
कुपितेदानीमहं किं करिष्यामि ।

राजा—अस्थाने कोप इत्यनुपपन्नं त्वयि । तथा हि ।

कदा मुखं वरतनु कारणादृते
तवागतं क्षणमपि कोपपात्रताम् ।

दिवासङ्केतः दिवासङ्गमः । दर्दुरा व्यहरन्ति मण्डूकाः शब्दायन्ते ।

कदेति । हे वरतनु श्रेष्ठाङ्गि । तव मुखम् । कारणात् ऋते कोपकारणं विना । क्षणमपि । कदा कोपपात्रतां कोपस्य योग्यताम् । आगतं प्राप्तम् । तथा हि

अपर्वणि ग्रहकलुषेन्दुमण्डला
विभावरी कथय कथं भविष्यति ॥१६॥

इरा०—अट्ठाणेत्ति सुट्ठु वाहरिदं अज्जउत्तेण। अण्णसंकन्तेसु
अस्थान इति सुष्ठु व्याहृतमार्यपुत्रेण। अन्यसंक्रान्तेषु
अह्माणं भाअहेएसु जदि उण कुप्पेअं तदो हस्सा भवेअं।
अस्माकं भागधेयेषु यदि पुनः कुप्येयं ततो हास्या भवेयम्।

राजा—त्वमन्यथा कल्पयसि। अहं पुनः सत्यमेव कोपस्थानं न पश्यामि। कुतः।

नार्हति कृतापराधोऽप्युत्सवदिवसेषु परिजनो बन्धम्।
इति मोचिते मयैते प्रणिपतितुं मामुपगते च ॥१७॥

इरा०—णिउणिए गच्छ देवीं विण्णावेहि। दिट्ठो भवदीए पक्ख-
निपुणिके गच्छ देवीं विज्ञापय। दृष्टो भवत्याः पक्ष-
वादो णं अज्जत्ति।
पातो नन्वद्येति।

निपु०—तह। (इति निष्क्रान्ता)
तथा।

विदू०—(आत्मगतम्) भो अणत्थो संपडिदो। बन्धणब्भट्ठो
भो अनर्थः संपतितः। बन्धनभ्रष्टो
गिहकवोदो चिल्लाए मुहे पडिदो।
गृहकपोतः चिल्लाया मुखे पतितः।

(प्रविश्य)

निपु०—(अपवार्य) भट्टिणि जदिच्छादिट्ठाए माहविआए
भट्टिनि यदृच्छादृष्टया माधविकया

अपर्वणि अपूर्णिमायाम्। ग्रहकलुषेन्दुमण्डला राहुग्रहणधूसरेन्दुबिम्बा। विभावरी निशा। कलुषा। कथं भविष्यति। कथय वद ॥१६॥

नार्हतीति। परिजनः। दासजनः। उत्सवदिवसेषु मङ्गलदिवसेषु। बन्धम्। न अर्हति न प्राप्तो भवति। किंविशिष्टः कृतापराधोऽपि अपराधमागः कृतवानपि। इति मत्वा मया मोचिते। मां प्रणिपतितुं नमस्कर्तुम्। उपगते प्राप्ते च॥१७॥

आचक्खिदं एव्वं खु एदं णिव्वुत्तंति । (कर्णे कथयति)
आख्यातम् एवं खल्वेतन्निर्वृत्तमिति ।

इरा०— (आत्मगतम्) **उववण्णं । सच्चं अअं एत्थ ब्रह्मबन्धुणा**
उपपन्नम् । सत्यमयमत्र ब्रह्मबन्धुना
किदो पओओ । (विदूषकं विलोक्य । प्रकाशम्) **इअं इमस्स कामतन्त-**
कृतः प्रयोगः । इयमस्य कामतन्त्र-
सचिवस्स णीदी ।
सचिवस्य नीतिः ।

विदू०—भोदि जदि णीदि ए एक्कंवि अक्खरं पढेअं तदो
भवति यदि नीतेरेकमप्यक्षरं पठेयं तदा
गाअत्तिं वि विसुमरेअं ।
गायत्रीमपि विस्मरेयम् ।

राजा— (आत्मगतम्) **कथं नु खल्वस्मात्संकटादात्मानं मोच-यिष्यामि ।**

(प्रविश्य)

जयसेना— (सावेगम्) **देव कुमारी वसुलच्छी कन्दुअं अणुधा-**
देव कुमारी वसुलक्ष्मीः कन्दुकमनुधा-
वन्ती पिङ्गलवाणरेण बलिअं तासिदा अङ्कणिसण्णा देवीए
वन्ती पिङ्गलवानरेण बलवत्त्रासिताङ्कनिषण्णा देव्याः
पवादकिसलअं विअ वेवमाणा ण किंवि पकिदिं पडिवज्जइ ।
प्रवातकिसलयमिव वेपमाना न किमपि प्रकृतिं प्रतिपद्यते ।

राजा—कष्टम् । कातरो बालभावः ।

इरा०— (सावेगम्) **तुवरदु अज्जउत्तो णं समासासेदुं ।**
त्वरतामार्यपुत्र एनां समाश्वासयितुम् ।
मा से संतासजणिदो विआरो वड्ढदु ।
मास्याः संत्रासजनितो विकारो वर्धताम् ।

राजा—अयमेनां संज्ञापयामि । (इति सत्वरं परिक्रामति)

कामतन्त्रं रतिरहस्यादि ।

विदू०—साहु रे पिङ्गलवाणर । साहु परित्तादो तुए संकटादो
साधु रे पिङ्गलवानर। साधु परित्रातस्त्वया संकटात्
सपक्खो ।
स्वपक्षः ।

(निष्क्रान्त: सवयस्यो राजा । इरावती निपुणिका प्रतिहारी च)

माल०—हला देविं चिन्तिअ वेवदि मे हिअअं । ण जाणे
सखि देवीं चिन्तयित्वा वेपते मे हृदयम् । न जाने
अदो वरं किं वा अणुहविदव्वं हविस्सदित्ति ।
ऽतः परं किं वानुभवितव्यं भविष्यतीति ।

(नेपथ्ये)

अच्चरिअं अच्चरिअं । अपुण्णे एव्व पञ्चरत्ते दोहलस्स मुउलेहिं
आश्चर्यमाश्चर्यम् । अपूर्ण एव पञ्चरात्रे दोहदस्य मुकुलैः
संणद्धो तवणीआसोओ । जाव देवीए णिवेदेमि ।
संनद्धस्तपनीयाशोकः । यावद्देव्यै निवेदयामि ।

(उभे श्रुत्वा प्रहृष्टे)

वकु०—आससिदु सही । सच्चप्पइण्णा देवी ।
आश्वसितु सखी । सत्यप्रतिज्ञा देवी ।

माल०—तेण हि पमदवणपालिआए पुट्ठदो होम ।
तेन हि प्रमदवनपालिकायाः पृष्ठतो भवावः ।

वकु०—तह ।
तथा ।

(इति निष्क्रान्ते)

इति चतुर्थोऽङ्कः ।

पञ्चमोऽङ्कः।

(ततः प्रविशत्युद्यानपालिका)

उद्यानपालिका—उवक्खित्तो मए किदसक्कारविहिणो तवणीआ-
उपक्षिप्तो मया कृतसत्कारविधेस्तपनीया-
सोअस्स वेदिआबन्धो। जाव अणुट्ठिदणिओअं अत्ताणं देवीए
शोकस्य वेदिकाबन्धः। यावदनुष्ठितनियोगमात्मानं देव्यै
णिवेदेमि। (परिक्रम्य) अहो देव्वस्स अणुकम्पणीआ मालविआ।
निवेदयामि। अहो दैवस्यानुकम्पनीया मालविका।
तस्सिं तह चण्डिआ देवी इमिणा असोअकुसुमवुत्तन्तेण
तस्यां तथा चण्डी देव्यनेनाशोककुसुमवृत्तान्तेन
पसादसुमुही हविस्सदि। कहिं णु खु देवी हवे। (विलोक्य) अह्मो
प्रसादसुमुखी भविष्यति। कुत्र नु खलु देवी भवेत्। अहो
एसो देवीए परिअणब्भन्तरो किंवि जदुमुद्दालञ्छिदं मञ्जूसं गेण्हिअ
एष देव्याः परिजनाभ्यन्तरः किमपि जतुमुद्रालाञ्छितां मञ्जूषां गृहीत्वा
चदुस्सालादो कुज्जो सारसओ णिक्कमदि। पुच्छिस्सं दाव णं।
चतुःशालातः कुब्जः सारसको निष्क्रामति। प्रक्ष्यामि तावदेनम्।

(ततः प्रविशति यथानिर्दिष्टः कुब्जः)

उद्यान०—(उपसृत्य) सारसअ कहिं पत्थिदोसि।
सारसक कुत्र प्रस्थितोऽसि।

सारसकः—महुअरिए विज्जापारगामिणं बम्हणाणं णिच्छद-
मधुकरिके विद्यापारगामिनां ब्राह्मणानां नित्यद-
क्खिणा दादव्वा। तां अज्जपुरोहिदस्स हत्थं पाविदुं।
क्षिणा दातव्या। तामार्यपुरोहितस्य हस्तं प्रापयितुम्।

उद्यान०—किंणिमित्तं।
किंनिमित्तम्।

उपक्षिप्तः कृतः। सत्कारविधिः दोहदादिसत्कारकर्म। भित्तिवेदिकाबन्धः आलवालाधिष्ठितकुड्यवेदिकाबन्धः। अनुष्ठितनियोगं कृतनिदेशानुष्ठानम्। प्रसादसुमुखी प्रसन्नमुखरागा।

सार०—जदप्पहुदि सुदं सेणावइणा जण्णतुरंगरक्खणे णिउत्तो
यदाप्रभृति श्रुतं सेनापतिना यज्ञतुरंगरक्षणे नियुक्तो
भट्टिदारओ वसुमित्तोत्ति तदप्पहुदि तस्स आऊसणिमित्तं अट्ठाइस
भर्तृदारको वसुमित्र इति तदाप्रभृति तस्यायुर्निमित्तं अष्टादश
सुवण्णपरिमाणं दक्खिणं देवी दक्खिणीएहिं परिग्गाहेदि ।
सुवर्णपरिमाणां दक्षिणां देवी दक्षिणीयैः परिग्राहयति ।

उद्यान०—जुज्जइ । अह कहिं देवी । किं वा अणुचिट्ठदि ।
युज्यते । अथ कुत्र देवी । किं वानुतिष्ठति ।

सार०—मङ्गलघरे आसणत्था भविअ विदब्भविसआदो
मङ्गलगृह आसनस्था भूत्वा विदर्भविषयाद्
भादुणा वीरसेणेण पेसिदं लेहकरेहिं वाइअमाणं लेहं सुणादि ।
भ्रात्रा वीरसेनेन प्रेषितं लेखकैर्वाच्यमानं लेखं शृणोति ।

उद्यान०—को उण विदब्भराअवुत्तन्तो ।
कः पुनर्विदर्भराजवृत्तान्तः ।

सार०—वसीकिदो किल वीरसेणप्पमुहेहिं भत्तुणो विजअ-
वशीकृतः किल वीरसेनप्रमुखैर्भर्तुर्विजय-
दण्डेहिं विदब्भणाहो । मोइदो अ से दाआदो माहवसेणो ।
दण्डैर्विदर्भनाथः । मोचितश्चास्य दायादो माधवसेनः ।
दूदो अ तेण महासाराणि रअणवाहणाणि सिप्पआरिआभूइट्ठं
दूतश्च तेन महासाराणि रत्नवाहनानि शिल्पकारिकाभूयिष्ठं
परिअणं अ उवाअणीकरिअ भट्टिणो सआसं पेसिदो सुवो किल
परिजनं चोपायनीकृत्य भर्तुः सकाशं प्रेषितः श्वः किल
भट्टारं देक्खिस्सदित्ति ।
भर्तारं पश्यतीति ।

उद्यान०—गच्छ । अणुचिट्ठ अत्तणो णिओअं । अहं वि
गच्छ । अनुतिष्ठाऽऽत्मनो नियोगम् । अहमपि
देवीं पेक्खिस्सं । (इति निष्क्रान्तौ)
देवीं प्रेक्षिष्ये ।

दक्षिणीयाः दक्षिणार्हाः । छप्रत्ययः । लेखं पत्रिकाम् ।

(प्रवेशकः)

(ततः प्रविशति प्रतीहारी)

प्रति०—आणत्तह्मि असोअसक्कारवावुदाए देवीए। विण्णावेहि
आज्ञप्तास्म्यशोकसत्कारव्यापृतया देव्या। विज्ञापय
अज्जउत्तं। इच्छम्हि अज्जउत्तेण सह असोअरुक्खस्स पसूणलच्छिं
आर्यपुत्रम्। इच्छाम्यार्यपुत्रेण सहाशोकवृक्षस्य प्रसूनलक्ष्मीं
पच्चक्खीकादुंति। ता जाव धम्मासणगदं देवं पडिवालेमि।
प्रत्यक्षीकर्तुमिति। तद्यावद्धर्मासनगतं देवं प्रतिपालयामि।

(नेपथ्ये वैतालिकौ)

प्रथमः—दिष्ट्या दण्डेनारिशिरःसु वर्तते देवः।

परभृतकलव्याहारेषु त्वमात्तरतिर्मधुं
नयसि विदिशातीरोद्यानेष्वनङ्ग इवाङ्गवान्।
विजयकरिणामालानत्वं गतैः प्रबलस्य ते
वरद वरदारोधोवृक्षैः सहावनतो रिपुः॥१॥

द्वितीयः—

विरचितपदं वीरप्रीत्या सुरोपम सूरिभि-
श्चरितमुभयोर्मध्येकृत्य स्थितं क्रथकैशिकान्।
तव हृतवतो दण्डानीकैर्विदर्भपतेः श्रियं
परिघगुरुभिर्दोर्भिः शौरेः प्रसह्य च रुक्मिणीम् ॥२॥

दण्डेन दण्डचक्रेण। दण्डचक्रं सेना।

परेति। हे वरद। परभृतकलव्यापारेषु कोकिलकलशब्दयुक्तेषु विदिशा-तीरोद्यानेषु, विदिशा नाम नदी, तत्कूलोद्यानेषु। अङ्गवान् शरीरवान्। अनङ्ग इव त्वम्। आत्तरतिः प्राप्तसुखः। मधुं वसन्तम्। नयसि गमयसि। प्रबलस्य। ते। विजयकरिणां युद्धकरिणाम् आलानत्वं गतैः। वरदारोधोवृक्षैः सह। रिपुः। अवनतः प्रवणोऽभूत् ॥१॥

विरचितपदमिति। हे सुरोपम देवसदृश। दण्डानीकैः सेनाचक्रैः। विदर्भपतेः विदर्भराजस्य। श्रियं राज्यलक्ष्मीम्। हृतवतः। तव च। परिघ-गुरुभिः अर्गलासारैः बाहुभिः दोर्भिः विदर्भपतेः सुतां रुक्मिणीम्। प्रसह्य हठा-

प्रती०—एसो जअसद्दसूइदप्पत्थाणो भट्टा इदो एव्व आअच्छदि
एष जयशब्दसूचितप्रस्थानो भर्तेत एवागच्छति ।
अहं वि दाव इमस्स पमुहादो किंवि ओसरिअ एदं मुहालिन्दतोरणं
अहमपि तावदस्य प्रमुखात्किमप्यपसृत्यैतन्मुखालिन्दतोरणं
समस्सिदा होमि । (इत्येकान्ते स्थिता)
समाश्रिता भवामि ।

(ततः प्रविशति सवयस्यो राजा)

राजा—

कान्तां विचिन्त्य सुलभेतरसंप्रयोगां
श्रुत्वा विदर्भपतिमानमितं बलैश्च ।
धाराभिरातप इवाभिहतं सरोजं
दुःखायते च हृदयं सुखमश्नुते च ॥३॥

विदू०—जह अहं पेक्खामि तह एक्कन्तसुहिदो भवं हविस्सदि ।
यथाहं पश्यामि तथैकान्तसुखितो भवान्भविष्यति ।

राजा—कथमिव ।

विदू०—अज्ज किल देवीए पण्डितकौशिकी भणिदा । भअवदि
अद्य किल देव्या पण्डितकौशिकी भणिता । भगवति

त्कृत्य । हृतवतः । शौरेश्च । युवयोरुभयोः । चरितम् । किंभूतं—सूरिभिः पण्डितैः । वीरप्रीत्या वीरसेनप्रीत्या । विरचितपदं विरचितकार्यम् । अन्यत्र शौरेः वीरप्रीत्या शौर्यप्रीत्या । वीरः शूर इति विरचितपदम् एवंभूतमुभयोश्चरितम् । क्रथकैशिकान् विदर्भान् मध्येकृत्य मध्येकृत्वा । आक्रम्येत्यर्थः । स्थितम् ॥२॥

कान्तामिति । सुलभेतरसंप्रयोगां दुर्लभसमागमाम् । कान्ताम् । विचिन्त्य । बलैः चतुरङ्गबलैः । विदर्भपतिं विदर्भराजम् । आनमितं च श्रुत्वा । स्थितस्य मे हृदयम् । आतपे अभिहतं भानुकरतप्तमध्याह्नातपाभिहतम् । सरोजं सरोरुहम् । धाराभिः वर्षधाराभिः । आश्वसितमिव । दुःखायते, सुखमश्नुते च । कान्तामघटितां विचिन्त्य दुःखायते, विदर्भपतिमानमितं श्रुत्वा सुखमश्नुते च ॥३॥

जं तुमं पसाहणगव्वं वहसि तं दंसेहि मालविआए सरीरे वैदब्भअं
यत्त्वं प्रसाधनगर्वं वहसि तद्दर्शय मालविकायाः शरीरे वैदर्भं
विवाहणेवच्छं ति। ताए अ सविसेसालंकिदा मालविआ। तत्तहोदी
विवाहनेपथ्यमिति। तया च सविशेषालंकृता मालविका। तत्रभवती
कदाचि पूरेइ भवदोवि मणोरहं।
कदाचित्पूरयेद्भवतोऽपि मनोरथम्।

राजा—सखे मदपेक्षानुवृत्त्या निवृत्तेर्ष्याया धारिण्याः पूर्वचरितैः संभाव्यत एतत्।

प्रतीहारी—(उपगम्य) जेदु भट्टा। देवी विण्णावेदि। तवणी-
जयतु भर्ता। देवी विज्ञापयति। तपनी-
आसोअस्स कुसुमसोहग्गदंसणेण मह आरम्भो सफलो करीअदु त्ति।
याशोकस्य कुसुमसौभाग्यदर्शनेन ममारम्भः सफलः क्रियतामिति।

राजा—ननु तत्रैव देवी।

प्रती०—अह इं। जहारहसंमाणसुहिअं अन्तेउरं विसज्जिअ
अथ किम्। यथार्हसंमानसुखितमन्तःपुरं विसृज्य
मालविआपुरोएण अत्तणो परिअणेण सह देवं पडिवालेदि।
मालविकापुरोगेणात्मनः परिजनेन सह देवं प्रतिपालयति।

राजा—(सहर्षं विदूषकं विलोक्य) जयसेने गच्छाग्रतः।

प्रती०—इदो इदो देवो। (सर्वे परिक्रामन्ति)
इत इतो देवः।

विदू०—(विलोक्य) भो वअस्स किंचि परिवुत्तजोवण्णो विअ
भो वयस्य किंचित्परिवृत्तयौवन इव
वसन्तो पमदवणे लक्खीअदि।
वसन्तः प्रमदवने लक्ष्यते।

राजा—यथाह भवान्।

अग्रे विकीर्णकुरबकफलजालकभिद्यमानसहकारम्।
परिणामाभिमुखमृतोरुत्सुकयति यौवनं चेतः ॥४॥

अग्र इति। अग्रे पूर्वतः। विकीर्णकुरबकं श्लथकुरबककुसुमम्। फल-जालकविभिद्यमानसहकारं सहकारस्य फलसमूहैः विभिद्यमानम्। परिणामाभि-

विदू०—(परिक्रम्य) भो अअं सो दिण्णणेवच्छो विअ कुसुमत्थ-
भो अयं स दत्तनेपथ्य इव कुसुमस्त-
वएहिं तवणीआसोओ । ओलोअदु भवं ।
बकैस्तपनीयाशोकः । अवलोकयतु भवान् ।

राजा—स्थाने खल्वयं प्रसवमन्थरोऽभूत् । यदिदानीमनन्यसाधा-
रणीं शोभामुद्वहति । पश्य ।

सर्वाशोकतरूणां प्रथमं सूचितवसन्तविभवानाम् ।
निर्वृत्तदोहदेऽस्मिन्सङ्क्रान्तानीव कुसुमानि ।। ५ ।।

विदू०—भो वीसद्धो होहि । अह्मेसु संणिहिदेसु वि धारिणी
भो विस्रब्धो भव । अस्मासु संनिहितेष्वपि धारिणी
पासपरिवट्टिणिं मालविअं अणुमण्णेदि ।
पार्श्वपरिवर्तिनीं मालविकामनुमन्यते ।

राजा—(सहर्षम्) सखे पश्य ।

मामियमभ्युत्तिष्ठति देवी विनयादुपस्थिता प्रियया ।
विस्तृतहस्तकमलया नरेन्द्रलक्ष्म्या वसुमतीव ।।६।।

(ततः प्रविशति धारिणी परिव्राजिका मालविका विभवतश्च परिवारः)

मालविका—(आत्मगतम्) जाणामि णिमित्तं कोदुआलंकारस्स
जानामि निमित्तं कौतुकालंकारस्य

मुखम् परिणत्यभिमुखम् । ऋतोः वसन्तस्य । यौवनम् । चेतः मनः । उत्सु-
कयति अभिलाषयति ।।४।।

सर्वाशोकेति । प्रथमं पूर्वम् । सूचितवसन्तमासानां पूर्वाभिव्यक्तवसन्तो-
द्गमानाम् । सर्वाशोकतरूणां सर्वेषामशोकवृक्षाणाम् । कुसुमानि । निवृत्तदोहदे
समापितदोहदे । अस्मिन् अशोके । सङ्क्रान्तानीव ।

मामिति । इयं देवी । विनयात् प्रियनृपतिगौरवात् उत्थिता सती ।
मामनु अस्मानुद्दिश्य । प्रियया मालविकया सह अभ्युत्तिष्ठति प्रत्युद्गता भवति ।
विस्तृतहस्तकमलया करतलनिहितसरोजया । नरेन्द्रलक्ष्म्या सार्धम् । वसुमती
भूदवीवे ।।६।।

तह वि विसिणीपत्तगदं विअ सलिलं वेवदि मे हिअअं। अवि अ
तथापि विसिनीपत्रगतमिव सलिलं वेपते मे हृदयम्। अपि च
दक्खिणेदरं वि मे णअणं बहुसो फुरदि।
दक्षिणेतरदपि मे नयनं बहुशः स्फुरति।

विदू०—भो वअस्स विवाहणेवच्छेण सविसेसं खु सोहदि
भो वयस्य विवाहनेपथ्येन सविशेषं खलु शोभते
अत्तहोदि मालविआ।
अत्रभवती मालविका।

राजा—पश्याम्येनाम्। यैषा

अनतिलम्बिदुकूलनिवासिनी
बहुभिराभरणैः प्रतिभाति मे।
उडुगणैरुदयोन्मुखचन्द्रिका
हतहिमैरिव चैत्रविभावरी ॥७॥

देवी—(उपेत्य) जेदु अज्जउत्तो।
जयत्वार्यपुत्रः।

विदू०—वड्ढदु भोदी।
वर्धतां भवती।

परि०—विजयतां देवः।

राजा—भगवति अभिवादये।

परि०—अभिप्रेतसिद्धिरस्तु।

देवी—(सस्मितम्) अज्जउत्त एस ते अह्मेहिं तरुणीजणसहा-
आर्यपुत्र एष तेऽस्माभिस्तरुणीजनसहा-
अस्स असोओ संकेदघरो कप्पिदो।
यस्याशोकः संकेतगृहं कल्पितः।

अनतीति। अनतिलम्बिदुकूलनिवासिनी अल्पावलम्बितदुकूलं वसाना। लघुभिः अल्पैः। आभरणैः भूषणैः। मे। प्रतिभाति। कथमिव। गतहिमैः असत्तुहिनैः। उडुगणैः नक्षत्रसमूहैः। सहिता। उदयोन्मुखचन्द्रिका उद्यच्चन्द्रकौमुदी। चैत्रविभावरी वसन्तरात्रिरिव ॥७॥

विदू०—भो आराहिओसि ।

भो आराधितोऽसि ।

राजा—(सव्रीडमशोकमभितः परिक्रामति)

नायं देव्या भाजनत्वं न नेयः

सत्काराणामीदृशानामशोकः ।

यः सावज्ञो माधवश्रीनियोगे

पुष्पैः शंसत्यादरं त्वत्प्रयत्ने ॥८॥

विदू०—भो वीसद्धो भविअ तुमं जोव्वणवदिं इमं पेक्ख ।

भो विस्रब्धो भूत्वा त्वं यौवनवतीमिमां पश्य ।

देवी—कं ।

काम् ।

विदू०—भोदि तवणीआसोअस्स कुसुमसोहम् ।

भवति तपनीयाशोकस्य कुसुमशोभाम् ।

(सर्वे उपविशन्ति)

राजा—(मालविकां विलोक्य । आत्मगतम्) कष्टः खलु संनिधि-वियोगः ।

अहं रथाङ्गनामेव प्रिया सहचरीव मे ।

अननुज्ञातसंपर्का धारिणी रजनीव नौ ॥९॥

(प्रविश्य)

कञ्चुकी—विजयतां देवः । देव अमात्यो विज्ञापयति ।

नेति । अयम् अशोकः । देव्याः । ईदृशानां सत्काराणाम् एवंभूतानां बहुमानानाम् । भाजनत्वं पात्रताम् । न न नेयः नेय एव । द्वौ नञौ प्रकृतमर्थं दृढं सूचयतः । यः अशोकः । माधवश्रीनियोगे वसन्तलक्ष्म्यादरे । सावज्ञः सावमतिः अबहुमानो भूत्वा । त्वत्प्रयत्ने दोहदादिप्रयत्ने । आदरं वाञ्छाम् । पुष्पैः विशिष्टपुष्पैः । शंसति ॥८॥

अहमिति । अहम् । रथाङ्गनामा चक्रवाक इव । प्रिया मालविका । सहचरी चक्रवाकीव । नौ आवयोः । रजनीव । धारिणी । अननुज्ञातसंपर्का अननुमतसङ्गमा भवति ॥९॥

तस्मिन् विदर्भविषयोपायने द्वे शिल्पकारिके मार्गपरिश्रमादलघुशरीरे इति पूर्वं न प्रवेशिते । संप्रति देवोपस्थानयोग्ये संवृत्ते । तदाज्ञां देवो दातुमर्हतीति ।

राजा—प्रवेशय ते ।

कञ्चु०—यदाज्ञापयति देवः । (इति निष्क्रम्य ताभ्यां सह पुनः प्रविश्य) इत इतो भवत्यौ ।

प्रथमा—हला मदणिए अपुव्वं इमं राअउलं पविसन्तीए
सखि मदनिके अपूर्वमिमं राजकुलं प्रविशन्त्याः
पसीददि मे हिअअं ।
प्रसीदति मे हृदयम् ।

द्वितीया—जोसिणीए मह वि एव्वं एव । अत्थि खु लोअप्पवादो ।
ज्योत्स्निके ममापि एवमेव । अस्ति खलु लोकप्रवादः ।
आआमि सुहं दुक्खं वा हिअअसमवत्था कहेदित्ति ।
आगामि सुखं दुःखं वा हृदयसमवस्था कथयतीति ।

प्रथमा—सो सच्चो दाणिं होदु ।
स सत्य इदानीं भवतु ।

कञ्चुकी—एष देव्या सह देवस्तिष्ठति । उपसर्पतां भवत्यौ ।

(उभे उपसर्पतः)

(मालविका परिव्राजिका च चेट्यौ दृष्ट्वा परस्परमवलोकयतः)

उभे—(प्रणिपत्य) जेदु भट्टा । जेदु भट्टिणी ।
जयतु भर्ता । जयतु भट्टिनी ।

(राजाज्ञया उभे उपविष्टे)

राजा—कस्यां कलायामभिविनीते भवत्यौ ।

उभे—भट्टा संगीदे अब्भन्तरे ह्म ।
भर्तः संगीतेऽभ्यन्तरे स्वः ।

राजा—देवि गृह्यतामनयोरन्यतरा ।

देवी—मालविए इदो पेक्ख । कदरा ते संगीदसहआरिणी रुच्चदि।
मालविके इतः पश्य । कतरा ते संगीतसहकारिणी रोचते

उभे—(मालविकां दृष्ट्वा) अह्मो भट्टदारिआ । (प्रणम्य) जेदु
अहो भर्तृदारिका । जयतु
जेदु भट्टदारिआ । (इति तया सह बाष्पं विसृजतः)
जयतु भर्तृदारिका ।

(सर्वे सविस्मयमवलोकयन्ति)

राजा—के वा भवत्यौ । का वा इयम् ।

उभे—देव इअं अह्माणं भट्टदारिआ ।
देव इयमस्माकं भर्तृदारिका ।

राजा—(कथमिव)।

उभे—सुणादु भट्टा । जो सो भट्टिणा विजअदण्डेहिं विदब्भ-
श्रृणोतु भर्ता । यः स भर्त्रा विजयदण्डैर्विदर्भ-
णाहं वसीकरिअ बन्धणादो मोइओ कुमारो माहवसेणो णाम ।
नाथं वशीकृत्य बन्धनान्मोचितः कुमारो माधवसेनो नाम ।
तस्स इयं कणीअसी भइणी मालविआ णाम ।
तस्येयं कनीयसी भगिनी मालविका नाम ।

देवी—कहं राअदारिआ इअं । चन्दणं खु मए पादुओव-
कथं राजदारिकेयम् । चन्दनं खलु मया पादुकोप-
ओएण दूसिदं ।
भोगेन दूषितम् ।

राजा—अथात्रभवती कथमित्थंभूता ।

माल०—(निश्वस्य । आत्मगतम्) विहिणिओएण ।
विधिनियोगेन ।

द्विती०—सुणादु भट्टा । दाआदवसंगदे अम्हाणं भट्टदारए माहवसेणे
श्रृणोतु भर्ता । दायादवशंगतेऽस्माकं भर्तृदारके माधवसेने
तस्स अमच्चेण अज्जसुमदिणा अह्मारिसं परिअणं उज्झिअ गूढं
तस्याऽमात्येनाऽर्यसुमतिनाऽस्मादृशं परिजनमुज्झित्वा गूढ-
अवणीदा एसा ।
मपनीतैषा ।

राजा—श्रुतपूर्वं मयैतत् । ततस्ततः ।

द्वितीया—भट्टा अदो वरं ण आणीमो ।

भर्तः अतः परं न जानीमः ।

परि०—अतः परमहं मन्दभाग्या कथयिष्यामि ।

उभे—भट्टदारिए अजकोसिईए विअ सरसंजोओ ।

भर्तृदारिके आर्यकौशिक्या इव स्वरसंयोगः ।

माल०—णं सा एव्व ।

ननु सैव ।

उभे—जदिवेसधारिणी अज्जकोसिई दुक्खेण विभावीअदि ।

यतिवेषधारिण्यार्यकौशिकी दुःखेन विभाव्यते ।

भअवदि वन्दामो ।

भगवति वन्दावहे ।

परि०—स्वस्ति भवतीभ्याम् ।

राजा—कथमाप्तवर्गोयं भगवत्याः ।

परि०—एवमेतत् ।

विदू०—तेण हि कहेदु भअवदी अत्तहोदीए उत्तन्तावसेसं ।

तेन हि कथयतु भगवत्यत्रभवत्या वृत्तान्तावशेषम् ।

परि०—(सवैक्लव्यम्) श्रूयतां तावत् । माधवसेनसचिवं सुमतिं ममाग्रजमवगच्छ ।

राजा—उपलब्धम् । ततस्ततः ।

परि०—स इमां तथागतभ्रातृकां मया सार्धमपवाह्य भवत्संबन्धापेक्षया पथिकसार्थं विदिशागामिनमनुप्रविष्टः ।

राजा—ततस्ततः ।

परि०—स चाटव्यन्तरे निविष्टो गताध्वा वणिग्जनो विश्रमितुम् ।

राजा—ततस्ततः ।

परि०—ततः ।

तूणीरपट्टपरिणद्धभुजान्तराल-
माकर्णलम्बिशिखिपिच्छकलापधारि ।

तूणीरेति । तूणीरपट्टपरिणद्धभुजान्तरालम् इषुबन्धनवध्रावबद्धभुजमध्यम् । आपार्ष्णिलम्बिशिखिपिच्छकलापधारि ईषत्पश्चाद्भागलम्बिनिबिडमयूरपिच्छम् ।

कोदण्डपाणि निनदत्प्रतिरोधकाना-
मापातदुष्प्रसहमाविरभूदनीकम् ॥१०॥

[मालविका भयं रूपयति]

विदू०—भोदि मा भआहि। अदिक्कन्तं खु भअवदी कहेदि।

भवति मा बिभेहि। अतिक्रान्तं खलु भगवती कथयति।

राजा—ततस्ततः।

परि०—ततो मुहूर्तं बद्धयुद्धास्ते पराङ्मुखीकृताः सार्थवाहयोद्धारस्तस्करैः।

राजा—भगवति अतः परमिदानीं कष्टं श्रोतव्यम्।

परि०—ततः स मत्सोदर्यः

इमां परीप्सुर्दुर्जाते पराभिभवकातराम्।
भर्तृप्रियः प्रियैर्भर्तुरानृण्यमसुभिर्गतः ॥११॥

प्रथमा—हा हदो सुमदी।

हा हतः सुमतिः।

द्वितीया—अदो खु भट्टिदारिआए इअं समवत्था संवुत्ता।

अतः खलु भर्तृदारिकाया इयं समवस्था संवृत्ता।

(परिव्राजिका बाष्पं विसृजति)

राजा—भगवति तनुभृतामीदृशी लोकयात्रा। न शोच्यस्तत्रभवान्सफलीकृतभर्तृपिण्डः। ततस्ततः।

परि०—ततोहं मोहमुपगता यावत्संज्ञामुपलभे तावदियं दुर्लभदर्शना संवृत्ता।

आ समन्ताल्लम्बि वा। कोदण्डपाणि धनुष्पाणि। निनदत् क्ष्वेलारवं कुर्वत्। प्रतिरोधी शत्रुः, शत्रुसैन्यानाम्। आपातदुष्प्रसहं प्रवेशदुस्सहम्। एवंभूतम्, अनीकम् आविरभूत् युद्धमाविर्बभूव ॥१०॥

इमामिति। दुर्जाते आपदि। पराभिभवकातरां परेषां शत्रूणाम् अभिभवः आक्रमणं तस्मात् कातरां भीताम्। इमां मालविकाम्। परीप्सुः पर्याप्तुं परित्रातुमिच्छुः। 'आप्ज्ञप्यृधाम् ईत्' इति ईत्वम्। 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः। भर्तृप्रियः स्वामिभक्तः। प्रियैः। असुभिः प्राणैः। भर्तुः। आनृण्यम् अनृणत्वम्। गतः प्राप्तः ॥११॥

राजा—महत्खलु कृच्छ्रमनुभूतं भगवत्या ।

परि०—ततो भ्रातुः शरीरमग्निसात्कृत्वा पुनर्नवीभूतवैधव्य-दुःखया मया त्वदीयं देशमवतीर्य इमे काषाये गृहीते ।

राजा—युक्तः सज्जनस्यैष पन्थाः । ततस्ततः ।

परि०—तत इयमप्याटविकेभ्यो वीरसेनं वीरसेनाच्च देवीं गता देवीगृहे लब्धप्रवेशया मया पुनर्दृष्टा इत्येतदवसानं कथायाः ।

माल०—(आत्मगतम्) किं णु खु संपदं भट्टा भणादि ।
किं नु खलु सांप्रतं भर्ता भणति ।

राजा—अहो परिभवोपहारिणो विनिपाताः । कुतः ।

प्रेष्यभावेन नामेयं देवीशब्दक्षमा सती ।
स्नानीयवस्त्रक्रियया पत्त्रोर्णं वोपयुज्यते ॥१२॥

देवी—भअवदि तुए अभिजणवदिं मालविअं अणाचक्ख-न्तीए असंपदं किदम् ।
भगवति त्वयाभिजनवतीं मालविकामनाचक्षाणयाऽसांप्रतं कृतम् ।

परि०—शान्तं पापं शान्तं पापम् । कारणेन खलु मया नैभृत्य-मवलम्बितम् ।

देवी—किं विअ तं कारणम् ।
किमिव तत्कारणम् ।

राजा—यदि वक्तव्यं कथ्यताम् ।

परि०—श्रूयताम् । इयं पितरि जीवति केनापि लोकयात्रागतेन सिद्धादेशेन साधुना मत्समक्षमादिष्टा संवत्सरमात्रमियं प्रेष्यभावमनुभूय ततः सदृशभर्तृगामिनी भविष्यतीति । तदवश्यंभाविनमादेश-

---

प्रेष्यभावेनेति । देवीशब्दयोग्या सती इयं मालविका । प्रेष्यभावेन परिचारकत्वेन । उपयुज्यते नाम नियुज्यते किल । पत्त्रोर्णं धौतकौशेयम् । वा इत्युपमायाम् । स्नानीयवस्त्रक्रियया स्नानार्हवस्त्रकरणेन ॥१२॥

मत्समक्षं मत्पार्श्वम् । सदृशभर्तृगामिनी क्षत्रियवंशयोग्यभर्तृगामिनी । अवश्यंभाविनं निश्चयानुभवितव्यम् । आदेशं नियोगम् ।

मस्यास्त्वत्पादशुश्रूषया परिणमन्तमवेक्ष्य कालप्रतीक्षया मया साधु कृतमिति पश्यामि ।

राजा—युक्ता प्रतीक्षा ।

कञ्चुकी—देव कथान्तरेणान्तरितम् । अमात्यो विज्ञापयति । विदर्भगतमनुष्ठेयमवधारितमस्माभिः । देवस्य तावदभिप्रेतं श्रोतुमिच्छामीति ।

राजा—मौद्गल्य तत्रभवतोर्भ्रात्रोर्यज्ञसेनमाधवसेनयोर्द्वैराज्यमिदानीमवस्थापयितुकामोऽस्मि ।

तौ पृथग्वरदाकूले शिष्टामुत्तरदक्षिणे ।
नक्तंदिवं विभज्योभौ शीतोष्णकिरणाविव ॥१३॥

कञ्चुकी—देव एवममात्यपरिषदे निवेदयामि ।

(राजाङ्गुल्यानुमन्यते)

(निष्क्रान्तः कञ्चुकी)

प्रथमा—(जनान्तिकम्) भट्टदारिए दिट्ठिआ भट्टदारओ अद्धरज्जे
भर्तृदारिके दिष्ट्या भर्तृदारकोर्धराज्ये

पडिट्ठं गमिस्सदि ।
प्रतिष्ठां गमिष्यति ।

माल०—एदं दाव बहु मन्तव्वं जं जीविसंसआदो मुत्तो ।
एतत्तावद्बहु मन्तव्यं यज्जीवितसंशयान्मुक्तः ।

(प्रविश्य)

कञ्चुकी—विजयतां देवः । देव अमात्यो विज्ञापयति । कल्याणी देवस्य बुद्धिः । मन्त्रिपरिषदोऽप्येवमेव दर्शनम् । कुतः ।

परिणतं फलितम् । कालप्रतीक्षया प्राप्तकालमपेक्ष्य । साधु कृतम् उत्तमं कृतम् । कथान्तरेण उपकथया । अन्तरितं छादितम् । अनुष्ठेयं कर्तव्यम् । द्वैराज्यं राज्यं द्विविधं कृत्वा ।

ताविति । वरदा नाम नदी तस्यास्तीरे । शिष्टौ विशिष्टौ प्रथितौ वा । तौ यज्ञसेनमाधवसेनौ । उत्तरदक्षिणे च । नक्तंदिवं दिवारात्रम् । विभज्य विभिद्य उभौ शीतोष्णकिरणौ चन्द्रादित्याविव ॥१३॥

द्विधा विभक्तां श्रियमुद्वहन्तौ
धुरं रथाश्वाविव संग्रहीतुः ।
तौ स्थास्यतस्ते नृपती निदेशे
परस्परावग्रहनिर्विकारौ ॥१४॥

राजा—तेन हि मन्त्रिपरिषदं ब्रूहि। सेनापतये वीरसेनाय लिख्यतामेवं क्रियतामिति ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रम्य सप्राभृतकं लेखं गृहीत्वा पुनः प्रविष्टः ।) अनुष्ठिता प्रभोराज्ञा । अयं पुनरिदानीं देवस्य सेनापतेः पुष्पमित्रस्य सकाशात्सप्राभृतको लेखः प्राप्तः । प्रत्यक्षीकरोत्वेनं देवः ।

(राजा सहसोत्थाय सोपचारं गृहीत्वा प्राभृतकं परिजनायार्पयति)

(लेखं च नाट्येनोद्वेष्टयति)

देवी—(आत्मगतम्) अह्महे तदोमुहं एव्व णो हिअअं । सुणिस्सं
अहो ततोमुखमेव नो हृदयम् । श्रोष्यामि
दाव गुरुअणस्स कुसलाणन्तरं वसुमित्तस्स वुत्तन्तं । अहिआरे
तावद्गुरुजनस्य कुशलानन्तरं वसुमित्रस्य वृत्तान्तम् । अधिकारे
खु मे पुत्तओ सेनावदिणा णिउत्तो ।
खलु मे पुत्रकः सेनापतिना नियुक्तः ।

राजा—(उपविश्य वाचयति) स्वस्ति । यज्ञशरणात्सेनापतिः पुष्पमित्रो वैदिशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात्परिष्वज्यानुदर्शयति । विदितमस्तु । योऽसौ राजयज्ञदीक्षितेन मया राजपुत्रशतपरिवृतं वसुमित्रं गोप्तारमादिश्य संवत्सरोपावर्तनीयो निरर्गलस्तुरगो विसृष्टः स

द्विधेति । संग्रहीतुः सारथेः । धुरं भारम् । रथाश्वाविव रथवाहनतुरङ्गाविव । द्विधा विभक्तां द्वैविध्यविभजिताम् । श्रियं राज्यलक्ष्मीम् । उद्वहन्तौ । परस्परानुग्रहनिर्विकारौ अन्योन्यविरोधरहितौ । नृपती यज्ञसेनमाधवसेनौ । तौ । निदेशे आज्ञायाम् । स्थास्यतः ॥१४॥

यज्ञशरणात् यज्ञगृहात्, अग्निहोत्राद्वा ।

निरर्गलः अनिवारणः ।

सिन्धोर्दक्षिणरोधसि चरन्नश्वानीकेन यवनानां प्रार्थितः । तत उभयोः सेनयोर्महानासीत्संमर्दः ।

(देवी विषादं नाटयति)

राजा—कथमीदृशं संवृत्तम् । (शेषं पुनर्वाचयति)

ततः परान्पराजित्य वसुमित्रेण धन्विना ।
प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः ॥१५॥

देवी—इमिणा आसंसिदं मे हिअअं ।

अनेनाश्वस्तं मे हृदयम् ।

राजा—(लेखशेषं वाचयति) सोऽहमिदानीमंशुमतेव सगरः पौत्रेण प्रत्याहृताश्वो यक्ष्ये । तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसेवनायागन्तव्यमिति ।

राजा—अनुगृहीतोऽस्मि ।

परि०—दिष्ट्या पुत्रविजयेन दम्पती वर्धेते । (देवीं विलोक्य)

भर्त्रासि वीरपत्नीनां श्लाघ्यानां स्थापिता धुरि ।
वीरसूरिति शब्दोयं तनयात्त्वामुपस्थितः ॥१६॥

विदूषकः—भोदि परितुट्ठोह्मि जं पिदरं अणुगदो वच्छो ।

भवति परितुष्टोस्मि यत्पितरमनुगतो वत्सः ।

परिव्राजिका—कलभेन खलु यूथपतिरनुकृतः ।

कञ्चुकी—देव अयं कुमारः ।

यवनानां यवनदेशराजानां तुरुष्काणां वा ।

अश्वानीकेन अश्वसेनया ।

ततः इति । ततः अनन्तरम् । परान् शत्रून् । पराजित्य जित्वा । धन्विना धनुस्सहायेन । वसुमित्रेण । प्रसह्य बलात्कृत्य । ह्रियमाणः आहृतः । वाजिराजः अश्वरत्नम् । निवर्तितः ॥१५॥

अकालहीनम् अकालक्षेपम् ।

भर्त्रासीति । वीरपत्नीनां वीरभार्याणाम् । श्लाघ्यायां श्रेष्ठायाम् । धुरि अग्रे । भर्त्रा नायकेन । स्थापितासि । वीरसूः वीरमातेत्ययं शब्दः । तनयात् पुत्रात् । त्वामुपस्थितः ॥१६॥

नैतावता वीरविजृम्भितेन
चित्तस्य नो विस्मयमादधाति ।
यस्याप्रधृष्यः प्रभवस्त्वमुच्चै-
रग्नेरपां दग्धुरिवोरुजन्मा ॥१७॥

राजा—मौद्गल्य यज्ञसेनश्यालमूरीकृत्य मुच्यन्तां सर्वे बन्धनस्थाः ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः)

देवी—जयसेणे गच्छ । इरावदिप्पमुहाणं अन्तेपुराणं पुत्तस्स
जयसेने गच्छ । इरावतीप्रमुखेभ्योऽन्तःपुरेभ्यः पुत्रस्य
विअअवुत्तन्तं णिवेदेहि ।
विजयवृत्तान्तं निवेदय ।

प्रती०—तह । (इति प्रस्थिता)
तथा ।

देवी—एहि दाव ।
एहि तावत् ।

प्रती०—(परिवृत्य) इअं ह्मि ।
इयमस्मि ।

देवी—(जनान्तिकम्) जं मए असोअदोहलणिओए मालविआए
यन्मयाशोकदोहदनियोगे मालविकायै
पइण्णादं तं से अहिजणं च णिवेदिअ मह वअणेण इरावदिं
प्रतिज्ञातं तदस्या अभिजनं च निवेद्य मम वचनेनेरावतीम्
अणुणेहि । तुए अहं सच्चादो ण परिब्भंसइदव्वेत्ति ।
अनुनय । त्वयाहं सत्यान्न परिभ्रंशयितव्येति ।

प्रती०—जं देवी आणवेदि । (इति निष्क्रम्य पुनः प्रविश्य)
यद्देव्याज्ञापयति ।

नेति । एतावता एतावन्मात्रेण । वीरविजृम्भितेन वीरशब्देन । नः अस्माकम् । चित्ते मनसि । विस्मयं नादधाति । अपां दग्धुर्वह्नेः बडवा-मुखाग्नेः । ऊरुजन्मा और्वः अतिबलपराक्रमः । यस्य प्रभवः उद्भवः । त्वम् । उच्चैः अतिशयेन । अप्रधृष्यः अनाक्रमितव्यः ॥१७॥

बन्धनस्थाः कारागृहस्थाः ।

भट्टिणि पुत्तविजअणिमित्तेण परितोसेण अन्तेउराणं आहरणाणं
भट्टिनि पुत्रविजयनिमित्तेन परितोषेणान्तःपुराणामाभरणानां
मञ्जूसह्मि संवुत्ता।
मञ्जूषाऽस्मि संवृत्ता।

देवी—किं एत्थ अच्चरिअं। साहारणो खु ताणं मह अ अअं
किमत्राश्चर्यम्। साधारणः खलु तासां मम चाय-
अब्भुदओ।
मभ्युदयः।

प्रती०—(जनान्तिकम्) भट्टिणि इरावदी उण विण्णावेदि।
भट्टिनि इरावती पुनर्विज्ञापयति।
सरिसं क्खु देवीए पहवन्तीए वअणं पुढमसंकप्पिदं ण जुज्जदि
सदृशं खलु देव्याः प्रभवन्त्या वचनं प्रथमसंकल्पितं न युज्यते
अण्णहा कादुं ति।
ऽन्यथाकर्तुमिति।

देवी—भअवदि तुए अणुण्णदा इच्छामि अज्जसुमदिणा पुढम-
भगवति त्वयानुज्ञातेच्छाम्यार्यसुमतिना प्रथम-
संकप्पिदं मालविअं अज्जउत्तस्स पडिवादेदुं।
संकल्पितां मालविकामार्यपुत्राय प्रतिपादयितुम्।

परि०—इदानीमपि त्वमेवास्याः प्रभवसि।

देवी—(मालविकां हस्ते गृहीत्वा) इदं अज्जउत्तो पिअणिवेदणाणुरूवं
इदमार्यपुत्रः प्रियनिवेदनानुरूपं
पारितोसिअं पडिच्छदु। (राजा सव्रीडं जोषमास्ते)
पारितोषिकं प्रतीच्छतु।

देवी—(सस्मितम्) किं अवधीरेदि मं अज्जउत्तो।
किमवधीरयति मामार्यपुत्रः।

विदू०—भोदि एसो लोअव्ववहारो सव्वो वि णववरो लज्जादुरो
भवति एष लोकव्यवहारः सर्वोऽपि नववरो लज्जातुरो
होदि। (राजा विदूषकमवेक्षते)
भवति।

विदू०—अह वा देवीए प्पणअविसेसं दिण्णदेवीसद्दं मालविअं
अथवा देव्या प्रणयविशेषं दत्तदेवीशब्दां मालविका-
अत्तभवं पडिग्गहीदुं इच्छदि।
मत्रभवान्प्रतिग्रहीतुमिच्छति।

देवी—एदाए राअदारिआए अहिजणेण एव्व दिण्णो देवीसद्दो।
एतस्या राजदारिकाया अभिजनेनैव दत्तो देवीशब्दः।
किं पुणरुत्तेण।
किं पुनरुक्तेन।

परि०—मा मैवम्।

अप्याकरसमुत्पन्ना मणिजातिरसंस्कृता।
जातरूपेण कल्याणि न हि संयोगमर्हति ॥१८॥

देवी—(स्मृत्वा) मरिसेदु भअवदी। अब्भुदअकहाए उइदं
मर्षयतु भगवती। अभ्युदयकथयोचितं
मए ण लक्खिदं। जअसेणे गच्छ दाव। कोसेअपत्तोण्णं उवणेहि।
मया न लक्षितम्। जयसेने गच्छ तावत्। कौशेयपत्रोर्णमुपनय।

प्रती०—जं देवी आणवेदि (इति निष्क्रम्य पत्रोर्णं गृहीत्वा पुनः
यद्देव्याज्ञापयति।
प्रविश्य) देवि एदम्।
देवि एतत्।

देवी—(मालविकामवगुण्ठनवतीं कृत्वा) अज्जउत्तो दाणिं इमं
आर्यपुत्र इदानीमिमां
पडिच्छदु।
प्रतीच्छतु।

राजा—त्वच्छासनादप्रत्युत्तरा वयम्।

परि०—हन्त प्रतिगृहीता।

अपीति। आकरसमुत्पन्नापि रत्नाकरसमुत्पन्ना। मणिजातिः रत्नादिः। असंस्कृता अनुत्तेजिता। कल्याणी महार्घापि। जातरूपेण स्वर्णाभरणेन। संयोगं सङ्गमम्। नार्हति॥१८॥

विदू०—अहो देवीए अत्तहोदो अणुऊलदा।
अहो देव्या अत्रभवतोऽनुकूलता।
(देवी परिजनमवलोकयति)
परिजनः—(मालविकामुपेत्य) जेदु भट्टिणी।
जयतु भट्टिनी।
(देवी परिव्राजिकामवेक्षते)
परि०—नैतच्चित्रं त्वयि।

प्रतिपक्षेणापि पतिं सेवन्ते भर्तृवत्सलाः साध्व्यः।
अन्यसरितां शतानि हि समुद्रगाः प्रापयन्त्यब्धिम् ॥१९॥

(प्रविश्य)
निपुणिका—जेदु भट्टा। इरावदी विण्णावेदि। जं उवआरादिक्क-
जयतु भर्ता। इरावती विज्ञापयति। यदुपचारातिक्र-
मेण तदा भट्टिणो अवरद्धं तं सअं एव्व भट्टिणो अणुऊलं णाम मए
मेण तदा भर्तुरपराद्धं तत्स्वयमेव भर्तुरनुकूलं नाम मया
आअरिदं। संपदं पुण्णमणोरहेण भट्टिणा पसादमेत्तेण संभाव-
चरितम्। सांप्रतं पूर्णमनोरथेन भर्त्रा प्रसादमात्रेण संभाव-
इदव्वत्ति।
यितव्येति।
देवी—णिउणिए अवस्सं ताए संदेसं अणुजाणिस्सदि अज्जउत्तो।
निपुणिके अवश्यं तस्याः संदेशमनुज्ञास्यत्यार्यपुत्रः।
निपु०—अणुगहीदम्हि।
अनुगृहीतास्मि।
परि०—देवाहममुना भवत्संबन्धेन चरितार्थं माधवसेनं सभा-
ज़यितुमिच्छामि यदि मे तव प्रसादः।

प्रतीति। भर्तृवत्सलाः प्रियप्रेमवत्यः। साध्व्यः पतिव्रताः। प्रतिपक्षेणापि सपत्नीवर्गेण सहापि। पतिं नायकम्। सेवन्ते। समुद्रगाः समुद्रं गच्छन्त्यः नद्यः। अन्यसरिताम् अन्यत्र समुद्भूतानां गिरिनदीनाम्। शतानि अनेकानि। उदधिं प्रापयन्ति हि ॥१९॥

देवी—भअवदि ण जुत्तं अह्मे परिच्चइदुं ।

भगवति न युक्तमस्मान् परित्यक्तुम् ।

राजा—भगवति मदीयेषु लेखेषु तत्रभवते त्वामुद्दिश्य सभाजनाक्षराणि पातयिष्यामि ।

परि०—युवयोः स्नेहेन परवानयं जनः ।

देवी—आणवेदु अज्जउत्तो किं भूओवि पिअं अणुचिट्ठामि ।

आज्ञापयत्वार्यपुत्रः किं भूयोपि प्रियमनुतिष्ठामि ।

राजा—किमतः परमपि प्रियमस्ति । तथापि इदमस्तु—

(भरतवाक्यम्)

त्वं मे प्रसादसुमुखी भव देवि नित्य-
मेतावदेव हृदये प्रतिपालनीयम् ।
आशास्यमीतिविगमप्रभृति प्रजानां
संपद्यते न खलु गोप्तरि नाग्निमित्रे ॥२०॥

(इति निष्क्रान्ताः सर्वे)

इति श्रीकालिदासस्य कृतौ मालविकाग्निमित्रे पञ्चमोऽङ्कः ।

त्वमिति । हे देवि । मे । नित्यम् । प्रसादसुमुखी प्रसन्नमुखरागा भव । प्रतिपक्षहेतोः सपत्नीजनमुद्दिश्य । एतावदेव मृगये । ईतिविगमप्रभृति । प्रजानां प्राणिनाम् । आशास्यं प्रार्थनीयम् । गोप्तरि अग्निमित्रे न न संपत्स्यते खलु जायत एव । सत्यत्र नाटकान्ते भरतेन सर्वकालसाधारण्येनाशंसावचने कर्तव्येऽत्र प्रजानामाशास्यसिद्धिं प्रति गोप्तुरग्निमित्रस्य कथनं तत्कालराजोपलक्षणमिति मन्तव्यम् ॥२०॥

श्लोकानुक्रमणिका ।

NOTES.

ACT I.

Sl. 1. Argument.—Lord shiva whose nature is vividly described is implored to help the audience to understand the real meaning of the play.

Criticism.—Compare it with the benedictory stanza in Shakuntalá. Both are dedicated to Lord Shiva. The eight forms mentioned here are fully explained there. They are water, fire, priest, sun, moon, ether, earth and air.

The opening is conventional; the praise of this particular deity is personal and has no connection with the plot.

Note the repetition of अपि. The figure of speech is शब्दविरोध.

Construction.—प्रणतबहुफले एकैश्वर्ये स्थितः अपि यः स्वयं कृत्तिवासाः, कान्तासंमिश्रदेहः अपि यः अविषयमनसां यतीनां परस्तात्, अष्टाभिः तनुभिः कृत्स्नं जगत् बिभ्रतः अपि यस्य अभिमानः न, सः ईशः सन्मार्गालोकनाय तामसीं वः वृत्तिं व्यपनयतु ।

Notes:—एकैश्वर्ये—एकं च तत् ऐश्वर्यं च तस्मिन् (ऐश्वर्यम् ईश्वरस्य भावः). प्रणतबहुफले—बहूनि फलानि यस्मात् स बहुफलः, प्रणतानां बहुफलः प्रणतबहुफलः तस्मिन्, षष्ठी. कृत्तिवासाः—कृत्तिः वासः यस्य सः । कान्तासंमिश्रदेहः—कान्तया संमिश्रः देहः यस्य । अविषयमनसाम्—अविद्यमानाः विषयाः येषां तानि अविषयाणि, तानि मनांसि येषाम्. सन्मार्गालोकनाय—सतः मार्गस्य आलोकनाय.

The word मार्ग in the fourth line may also refer to a kind of dramatic representation which is defined thus.—

मार्गो देशीति तद् द्वेधा कथितं नाट्यवेदिभिः ।
तत्र मार्गो भवेन्नाट्यं नाट्यवेदोक्तलक्षणम् ॥

SL. 2. Argument—A plea for the introduction of the new poet Kálidása.

Criticism.—The statement though personal is one of universal application.

Construction—सर्वं काव्यं पुराणम् इति एव साधु न, नवम् इति अवद्यं अपि च न, सन्तः परीक्ष्य अन्यतरत् भजन्ते, मूढः परप्रत्ययनेयबुद्धिः ।

Notes.—परप्रत्ययनेयबुद्धिः—परस्य प्रत्ययेन नेया बुद्धिः यस्य ।

Sl. 3. Argument—The play begun in obedience to the order of the audience.

Criticism.—A conventional way of introducing the plot.

Construction.—देव्याः धारिण्याः सेवादक्षः अयं परिजनः इव शिरसा प्रथमगृहीतां परिषदः आज्ञां कर्तुम् इच्छामि ।

Nots.—प्रथमगृहीताम्—प्रथमं गृहीता ताम्, सुप्सुपा Comp. सेवादक्षः—सेवायां दक्षः.

P. 3. L. 1. This is the real opening of the play. The conversation of the maid--servants is significant in so far as it prepares the plot, for it introduces the heroine Málaviká and the Snake-ring which, like the ring in Shakuntalá, has a subsequent importance.

The beginning of this domestic comedy is very fine. As we are led to the music-hall, we forget all the woes and worries of life. The play is a comedy out and out. It has none of the horrors of Vikramorvashiya which are roused by the capture of Urvashi by demons. It has no sorrow like the one which comes over the minds of her friends at Urvashi's loss.

P. 3. L. 6. छलिकम्:—A kind of dramatic representation in which the actor or actress reveals his or her own sentiments. It is defined:—

तदेव छलिकं नाम साक्षाद्यदभिनीयते ।
व्यपदिश्य पुरावृत्तं स्वाभिप्रायप्रकाशकम् ॥

Sl. 4. Argument.—A defence of the scenic art. Its superiority over the Sacrifice.

Criticism.—The difference between drama and lyrical poetry is the difference between the objective and subjective arts. Drama is purely objective, while lyrical poetry is subjective. The dramatist depicts life as he sees it, the poet expresses what he feels. Yet there are passages in the drama which we may safely class as subjective. The praise of the scenic art has a personal ring about it. The conviction of Ganadása seems to be the conviction of the poet and dramatist himself.

Construction.—मुनयः इदं देवानाम् कान्तं चाक्षुषं क्रतुम् आमनन्ति, इदं रुद्रेण उमाकृतव्यतिकरे स्वाङ्गे द्विधा विभक्तम्, अत्र त्रैगुण्योद्भवं लोकचरितं नानारसं दृश्यते, एकम् अपि नाट्यं भिन्नरुचेः जनस्य बहुधा समाराधकम् ।

Notes.—उमाकृतः—उमया कृतः व्यतिकरः यत्र. त्रैगुण्योद्भवम्—त्रयो गुणाः एव त्रैगुण्यं तस्मात् उद्भवः यस्य तत्।

Sl. 5. Argument.—Málaviká's genius by virtue of which she excels her teacher in the scenic art.

Criticism,—A characteristic of our heroine is her skill in exhibition.

The verse is quoted by Dhananjaya in the Dasharúpaka in the illustration of that genius which surpasses that of the instructor. बुद्धिः प्रज्ञा—गृहीतविशेषकरी तु प्रज्ञा मालविकाग्निमित्रे

यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।
तत्तद्विशेषकरणात्प्रत्युपदिशतीव मे बाला ॥"

The sentiment is अद्भुत.

Construction—प्रयोगविषये मया तस्यै यत् यत् भाविकम् उपदिश्यते, बाला तत् तत् विशेषकरणात् मां प्रत्युपदिशति इव ।

P. 7. L. 8. The talk between Bakulávaliká and Ganadása reveals how Málaviká came over to the court of Agnimitra.

Sl. 6.—Argument.—The satisfaction of Ganadása on getting such a pupil as Málaviká.

Criticism.—Kálidása has been praised for his similes. He illustrates the most abstract phenomena by the most concrete images. Here the transmission of the art from the teacher to the pupil is compared to the entry of rain-drops into the sea-shell, and the change of this art to a higher art in the pupil to the change of water into pearls.

Construction.—आधातुः शिल्पं पात्रविशेषे न्यस्तं पयोदस्य जलं समुद्रशुक्तौ मुक्ताफलताम् इव गुणान्तरं व्रजति ।

Notes—मुक्ताफलताम्—मुक्ताफलस्य भावः तत्ताम्। मुक्ता फलमिव मुक्ताफलम् । कर्म० ।

P.7.L. 21.—दीर्घिकावलोकनगवाक्षगता—No other dramatist would have put the maximum of meaning into the minimum of words. Here we get a window that overlooks a pond with the lovely figure of Málaviká occupying it and a little flow of breeze around.

Sl. 7. Argument—The writer is the king of Vidarbha. His terms to release Mádhavasena.

Criticism—This insolent behaviour of the king of Vidarbha has a dramatic significance. It calls forth the heroic spirit of Agnimitra who does not submit to it. Otherwise the king Agnimitra is a love-sick hero.

Construction—पूज्यः संयतं मम श्यालं मौर्यसचिवं विमुञ्चति यदि, ततः मयापि सद्यः माधवसेनः बन्धनात् मोक्ता ।

Sl. 8. Argument—A reason for the commencement of hostilities with the king of Vidarbha.

Criticism—Here we have the comparison of the animate with the inanimate, i.e. of man with nature. The simile is most apt. The idea seems to have been taken from some old treatise on politics.

Construction—अचिराधिष्ठितराज्यः शत्रुः प्रकृतिषु अरूढमूलत्वात् नवसंरोहणशिथिलः तरुः इव समुद्धर्तुं सुकरः ।

Notes—अचिराधिष्ठितः—अचिरेण अधिष्ठितं राज्यं येन. अरूढ०—न रूढं मूलं यस्य तत्, तस्मात्. नव०—नवं यत् संरोहणं तेन शिथिलः.

P. 10. L. 10. Vidúṣaka is a conventional figure in the Sanskrit drama. Here he has an important part to play—the part of an intriguer. We can safely leave him out in Shakuntalá. He is remembered there only for his dispute with the commander of the forces in the second act, and for the laughter he excites in the seventh act when beaten by Málati. These two incidents are melodramatic. But we cannot do without him here. As a humorist, as an intriguer he is most essential to the development of the plot in this play.

Sl. 9. Argument—The recognition of the importance of the vidúsaka by the king.

Criticism—The king speaks here in considered, moral accents which makes him a finer lover than he is. This seriousness saves him from recklessness.

Construction—सप्रतिबन्धम् अर्थम् अधिगन्तुम् सहायवान् एव प्रभुः । सचक्षुः अपि दीपेन विना तमसि दृश्यं न पश्यति ।

Sl. 10. Argument—The introduction of Gaṇadása and Haradatta.

Criticism—Kálidása compares generally the abstract with the concrete; but when he compares the concrete with the abstract, he represents the abstract as the concrete. In the present case the abstract sentiments are first invested with a form and then compared with the preceptors.

Construction—शरीरिणौ साक्षात् भावौ इव परस्परजयोद्यतौ उभौ अभिनयाचार्यौ त्वां द्रष्टुम् इच्छतः ।

Notes—शरीरिणौ—शरीरम् अस्य अस्ति इति शरीरी तौ. परस्पर-जयोद्यतौ, परस्परस्य जयः, तस्मिन् उद्यतौ ।

Sl. 11. Argument—Fear mingled with wonder at the sight of the king.

Criticism—It is truly said of beauty that it charms us as often as we view it. Compare this with the following verse from Mágha's Shishupálavadham.

दृष्टोपि शैलः स मुहुर्मुरारेरपूर्ववद्विस्मयमाततान ।
क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ॥ (४।१७)

With the idea contained in the first half of the introductory line compare Raghu I अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः । and Paucatantra दुःखेन प्रतिगम्यते प्रचकितै राज्ञां गृहं वार्धिवत् ।

Construction—न परिचितः च न, अरम्यः च न, तथा अपि अहम् अस्य पार्श्वे चकितम् उपैमि, स एव अयं सलिलनिधिः इव मे अक्ष्णोः नवः नवः भवति ।

Notes—अरम्यः—न रम्यः . सलिलनिधिः—सलिलस्य निधिः .

Sl. 12. Argument—The dazzling figure of the king.

Criticism—Some vainly seek traces, in this verse, of the covert praise of one of his patrons by the dramatist.

Construction—द्वारे नियुक्तपुरुषानुमतप्रवेशः सिंहासनान्तिकचरेण सह उपसर्पन् विनिवर्तितदृष्टिपातैः अस्य तेजोभिः पुनः वाक्यात् ऋते प्रतिवारितः इव अस्मि ।

Notes—नियुक्त०—नियुक्तेन पुरुषेण अनुमतः प्रवेशः यस्य. विनिवर्तित०—विशेषेण निवर्तितः दृष्टिपातः यैः.

Sl. 13. Argument—The Parivrájiká flatters the queen.

Criticism—The king is compared with the sun and Haradatta with the fire. The queen is compared with the night and Ganadása with the moon. It is difficult to reason out the comparison.

Construction—अनलः भानोः परिग्रहात् अतिमात्रभासुरत्वं पुष्यति, चन्द्रः अपि निशापरिगृहीतः महिमानम् अधिगच्छति ।

Notes—**अतिमात्रभासुरत्वम्**—भासुरस्य भावः भासुरत्वम्, अतिमात्रं च तत् भासुरत्वं च. **निशापरिगृहीतः**—निशया परिगृहीतः, तृतीयातत्पुरुषः ।

Sl. 14. Argument—The praise of Dhárini by the king.

Criticism—Kálidása rarely compares the concrete with the abstract (e.g. Raghu I,1. वागर्थाविव) but when he does so, he generally gives an outward, visible form to the abstract image. Here metaphysical science is no longer an abstract thing. It is invested with a form and then compared with the Parivrájiká.

Construction—मङ्गलालङ्कृता यतिवेषया कौशिक्या (समं) विग्रहवत्या अध्यात्मविद्यया समं त्रयी इव भाति ।

Notes—**मङ्गलालङ्कृता**—मङ्गलार्थं कल्याणार्थमलङ्कृता इति । For another analysis see commentary. **यतिवेषया**—यतेर्वेषः = यतिवेषः, यतिवेष इव वेषो यस्याः तया ।

Sl. 15. Argument—The king receives blessings from the Parivrájiká after he has paid his respects to her.

Criticism—The adjectival clauses 'महासारप्रसवयोः' and 'सदृशक्षमयोः' suggest the comparison of the queen with the earth. Compare the following where the queen is compared with the earth :—

मामियमभ्युत्तिष्ठति देवी विनयादुपस्थिता प्रियया ।
विस्तृतहस्तकमलया नरेन्द्रलक्ष्म्या वसुमतीव ॥

Construction—महासारप्रसवयोः सदृशक्षमयोः धारिणीभूतधारिण्योः द्वयोः भर्ता शरच्छतं भव ।

Notes—**महासारप्रसवयोः**—महासारः प्रसवः ययोः तयोः, or महासाराणां प्रसवौ उत्पत्तिस्थाने तयोः. **सदृशक्षमयोः**—सदृशी क्षमा ययोः. **धारिणीभूतधारिण्योः**—धारिणी च भूतानां धारिणी च तयोः ।

Sl. 16 Argument—The qualities that go to make the best teacher.

Criticism—Notice the seemingly simple Parivrájiká. She renders all help to bring about the union of Málaviká and the king, but the role she plays is out of keeping with her character of an ascetic. Her speech is cunning enough, though on the surface of it, it is a simple innocuous statement of truth. This serves the purpose, so fondly cherished, of bringing Málaviká in the presence of the king.

Constriction—कस्यचित् क्रिया आत्मसंस्था श्लिष्टा, अन्यस्य सङ्क्रान्तिः विशेषयुक्ता, यस्य उभयं साधु सः एव शिक्षकाणां धुरि प्रतिष्ठापयितव्यः ।

Notes—प्रतिष्ठापयितव्यः—प्रतिष्ठापयितुं योग्यः .

Sl. 17. Argument—Ganadása explains why he does not refrain from entering into the proposed competition, as the queen would like him to.

Criticism—Next to the Parivrájiká comes Gaṇadása who with his outward seriousness is the promoter of the cause of the king. His tone is dignified, and in his lack of patience he differs from the Parivrájiká who is calm.

Construction—लब्धास्पदः अस्मि इति विवादभीरोः परेण निन्दां तितिक्षमाणस्य यस्य आगमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति ।

Notes—लब्धास्पदः—लब्धम् आस्पदं येन. विवादभीरोः—विवादात् भीरुः, तस्य.

Sl, 18, Argument—The Parivrájiká reconciles the offended queen.

· **Criticism**—The epithet 'moon-faced' is inappropriate here. The speech of the ascetic is expected to be free from appreciation of physical beauty. Besides, the epithet is not meant as such; it is there only to flatter the angered queen. Compare with the idea in the third quadrant the following from the Vikramorvasíya and the Shakuntalá—प्रभुता रमणेषु योषिताम् and उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ।

Construction—इन्दुवदने अत्रभवतः अनिमित्तं किं पराङ्मुखी भवसि, कुटुम्बिन्यः भर्तृषु प्रभवन्त्यः अपि कारणकोपाः हि ।

Notes—इन्दुवदने—इन्दोः वदनम् इव वदनं यस्याः तत्सम्बुद्धौ. कारणकोपाः—कारणात् कोपः यासां ताः ।

Sl. 19. Argument—Gaṇadása holds out a threat to leave the service of the queen if not allowed to compete.

Criticism—The verse reflects the impatient nature of the dancing master. The threat to the queen is the best device under the circumstances to compel her to grant him the permission sought, which she does not like to do.

Construction—विवादे आत्मनः क्रियासङ्क्रान्तिं दर्शयिष्यामि, यदि मां न अनुजानासि त्वया अहं परित्यक्तः अस्मि ।

Notes—क्रियासङ्क्रान्तिम्—क्रियायाः सङ्क्रान्तिः ताम् ।

Sl. 20. Argument—The king when suspected, defends himself and shifts the blame to the teachers.

Criticism—The queen is shrewd enough to know the real motive of this dispute but she offers little resistance. Her endeavours to conciliate Gaṇadása are frustrated by the Vidúsaka, and openly she does not like to go against the wishes of the conspirators and is easily entrapped into acting against her own wishes.

Construction—अन्यथा गृहीत्वा अलं, मनस्विनि इदं मया न खलु प्रयुक्तम्, समानविद्याः प्रायः परस्परयशःपुरोभागाः ।

Notes—परस्परयशःपुरोभागाः—परस्परस्य यशसि पुरोभागः येषाम् ।

Sl. 21. Argument—The effect of music.

Metre—प्रहर्षिणी । The form is most apt for the joyful content.

Criticism—The intrigue has succeeded. The competitors are ready for the representation of their art by their pupils. The queen has reluctantly consented to it. There is no occasion for sadness. The sweet sounds of the musical instruments gladden the heart of the listeners.

Construction—जीमूतस्तनितविशङ्किभिः उद्ग्रीवैः मयूरैः अनुरसितस्य पुष्करस्य निर्ह्रादिनी उपहितमध्यमस्वरोत्था मायूरी मार्जना मनांसि मदयति ।

Notes—जीमूतस्तनितविशङ्किभिः—जीमूतस्य स्तनितं विशङ्कन्त इति तैः. उपहितमध्यमस्वरोत्था—उपहितात् मध्यमात् स्वरात् उत्तिष्ठतीति तथोक्ता ।

Beginning with the middle tone taken as the basis. उपहित—Taken as the basis, literally placed under. बाहुमुपधाय शेते—He sleeps placing his arm under (his head). जीमूत०—जीमूतः—a cloud. जीवनस्य उदकस्य मूतः पटबन्ध इति जीमूतः (पृषोदरादि) इति स्वामी. The word literally means a canvass-vessel for water. मायूरी मार्जना—The sound of tabor which is dear to the peacocks.

P.21.L. 12. विसंवादयिष्यति—Will disappoint us (of). Amar gives विसंवाद in the sense of विप्रलम्भ which is interpreted as अङ्गीकृतासंपादन by Ksira. Our poet uses the root वद् with वि and सम् in this sense elsewhere also. Cf. रमणीयोऽवधिर्विधिना विसंवादितः—Sákuntalá.

Sl. 22. Argument—The effect of the musical sound upon the king.

Criticism—The second half of the verse is only an assumption and hence the figure of speech is उत्प्रेक्षा and not उपमा ।

Construction—अयं मुरजवाद्यरागः धैर्यावलम्बिनम् अपि मां सिद्धिपथम् अवतरतः स्वमनोरथस्य शब्द इव त्वरयति ।

Notes—धैर्यावलम्बिनम्—धैर्यम् अवलम्बत इति धैर्यावलम्बी तम्. धीरस्य भावः=धैर्यम्, with the suffix ष्यञ् (य). त्वरयति—from त्वर् to hurry. It does not take वृद्धि before the causal suffix णिच्, for it is classed with the घटादि roots which are technically named मित्. Hence त्वारयति (with वृद्धि) would be incorrect. मुरजवाद्यरागः—मुरजवाद्यस्य रागः. सिद्धिपथम्—सिद्धेः पन्थाः तम् । पथिन् is changed to पथ when standing at the end of a compound. मनसो रथः=मनोरथः ।

Act II

P. 22. L. 10. चतुष्पदा—Consisting of four stanzas, each having a separate theme. लयमध्या=मध्यलया—In medium time. लय is defined by commentators on Amara as गीतवाद्यपादादिन्यासानां क्रियाकालयोः साम्यम् ।

P. 22. L. 1. There is no interval between the first and

the second acts. The action of the first act is continued uninterruptedly in the second. The main sentiment in this act is शृङ्गार.

Sl. 1. Argument—The king's anxiety to see Málaviká.

Criticism—His impatience reveals the stage of love that has been reached.

It is one of the beautiful verses in this play. The poetical fancy (उत्प्रेक्षा) is truly Kálidásian. The eye is so thirsty, so impatient that it does not wait for the operation of the hand for the removal of the curtain, but prepares to take upon itself the function that properly belongs to the hand.

Construction—नेपथ्यपरिगतायाः तस्याः दर्शनसमुत्सुकं मे चक्षुः अधीरतया तिरस्करिणीं संहर्तुं व्यवसितम् इव ।

Notes—**दर्शनसमुत्सुकम्**—दर्शने समुत्सुकम्. **अधीरतया**—धीरस्य भावः धीरता, न धीरता अधीरता तया. **तिरस्करिणी**—A curtain. तिरस्क्रियते ऽनयेति । णिनिः ।

Sl. 2. Argument—The king is convinced of Málaviká's beauty.

Criticism—Before the king had actually seen Málaviká, he doubted if she could be as beautiful as portrayed; but now that he sees her for the first time, he finds that the picture falls far short of the original. He therefore thinks that the painter had not the requisite concentration at the time.

Construction—मे हृदयं चित्रगतायाम् अस्यां कान्तिविसंवादशङ्कि, इयं सम्प्रति येन आलिखिता (तं) शिथिलसमाधिं मन्ये ।

Notes—**कान्तिविसंवादशङ्कि**—कान्तेः विसंवादः तं शङ्कत इति तथोक्तम्. विसंवाद means disagreement or disparity. संवाद means agreement, correspondence. Cf. Mu. I. 19 कमलानां मनोहराणामपि रूपाद्विसंवदति शीलम् the nature of lotuses though beautiful is at variance with their form.

शिथिलसमाधिम्—शिथिलः समाधिः यस्य तम् ।

Sl. 3. Argument—The description of Málaviká's features.

Criticism—The verse is quoted by Dhananjaya in the Dasharúpaka in the illustration of युवतिविभाव a kind of शृङ्गार

sentiment. Vishvanátha quotes it in the Sáhityadarpana. Compare the following note :—

'ननु यदि विभावानुभावव्यभिचारिभिर्मिलितैरेव रसस्तत् कथमेकस्य द्वयोर्वा सद्भावेऽपि स स्यात् इत्युच्यते—

सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते ॥ (४७)

अन्यसमाक्षेपश्च प्रकरणादिवशात् यथा :—

दीर्घाक्षं शरदिन्दुकान्तिवदनम् ।

अत्र मालविकामभिलषतोऽग्निमित्रस्य मालविकारूपविभावमात्रवर्णने सञ्चारिणामौत्सुक्यादीनामनुभावानाञ्च नयनविस्फारादीनामौचित्यादेवाक्षेपः' ।

For more of criticism, see Introduction.

Construction—अस्याः वदनं दीर्घाक्षं शरदिन्दुकान्ति, बाहू अंसयोः नतौ, उरः निविडोन्नतस्तनं संक्षिप्तं, पार्श्वे प्रमृष्टे इव, मध्यः पाणिमितः, जघनं नितम्बि, पादौ अरालाङ्गुली, नर्तयितुः मनसि छन्दः यथा अस्याः वपुः तथा एव श्लिष्टम् ।

Notes—**दीर्घाक्षम्**—दीर्घे अक्षिणी यत्र. **शरदिन्दुकान्ति**—शरदि यः इन्दुः तस्य कान्तिः इव कान्तिर्यस्य । **निबिडोन्नतस्तनम्**—निविडौ उन्नतौ स्तनौ यत्र. पाणिमितः—पाणिना मितः. **अरालाङ्गुली**—अरालाः अङ्गुलयः ययोः । **संक्षिप्तं**—Compact. सम् √ क्षिप् means to put together. **छन्दः**—Desire. In this sense the word is taken to be अदन्त (ending in short अ) and is masculine. Sometimes छन्दस् *n.* is also used in this sense.

Sl. 4. Argument—The song of Málaviká.

Criticism—The first line indicates her disappointment, the second hope, the third anxiety, the fourth her helplessness and passionate love for the king.

Construction—मे प्रियः दुर्लभः (हे) हृदय तस्मिन् निराशं भव, अहो मे वामः अपाङ्गकः किम् अपि परिस्फुरति, चिरदृष्टः सः एषः कथम् उपनेतव्यः, नाथ पराधीनां मां त्वयि सतृष्णां परिगणय ।

Notes—**चिरदृष्टः**—चिरात् दृष्टः ।

Sl. 5. Argument—The construction the king puts upon Málaviká's speech.

Criticism—The king is an experienced lover. He perfectly understands the meaning of Málaviká's song.

Construction—नाथ त्वम् इमं जनम् अनुरक्तं विद्धि इतिगेये स्वाङ्गनिर्देशपूर्वम् वचनम् अभिनयन्त्या धारिणीसंनिकर्षात् प्रणयगतिम् अदृष्ट्वा सुकुमारप्रार्थनाव्याजम् अहम् उक्त इव ।

Notes—**अनुरक्तम्**—Attached, deeply in love with. √रञ्ज् to please, preceded by अनु means to be attached to and is used in the कर्मकर्तृ construction. राजानमनुरज्यन्ते प्रकृतयः. **स्वाङ्गनिर्देशपूर्वम्**—स्वाङ्गस्य निर्देशः पूर्वो यस्मिन्कर्मणि तथोक्तम्. **प्रणयगतिम्**—प्रणयस्य गतिः ताम्. **धारिणीसंनिकर्षात्**—धारिण्याः संनिकर्षः तस्मात्. **सुकुमारप्रार्थनाव्याजम्**—सुकुमारा चासौ प्रार्थना च तस्या व्याजो यस्मिन् कर्मणि तथोक्तम्.

P. 25. L. 13. शोभान्तरम्—Excellence of beauty. अन्तर *n.* means here विशेष.

Sl. 6. Argument—The description of Máláviká in dance.

